शास्त्रसंदेश-४१

# स्तोत्रसंदेशमाला

## पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि




१६

मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-४१

# स्तोत्र संदेशमाला-१५

## पञ्च-परमेष्ठि-सिद्धचक्राणां स्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.


પ્રકાશક-પ્રાપ્તિ સ્થાન

શાસ્ત્રસંદેશ

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૫

## पञ्च-परमेष्ठि-सिद्धचक्राणां स्तोत्राणि


આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૬ + ૨૪૪ + ૪

સ્તોત્ર : ૧૨૧ શ્લોક : ૧૮૪૮


: પ્રમાર્જના :

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

: છંદ-સંયોજના :

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.


ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!      અનુમોદનીય...!   અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૫-૧૬ ના
## દ્રવ્ય લાભાર્થી



## શ્રી જિનાજ્ઞા આરાધક શ્વે. મૂર્તિપૂજક તપગચ્છ જૈન ટ્રસ્ટ- મુલુંડ (રામબાગ)

આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની
અમો હાર્દિક અનુમોદના
કરીએ છીએ.
ટ્રસ્ટીગણ તથા કાર્યકરોના
અમો આભારી છીએ.

શાસ્ત્રસંદેશ, સુરત



**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | तथापि प्राणनाथ ! प्राक्, श्रुतं | पू.श्री सिद्धर्षिगणि | १ |
| २ | अर्हददेहाचार्योपाध्याय- | पू.आ. श्री सिंहतिलकसूरि | २ |
| ३ | श्रीतीर्थाय नमस्तस्मै, पञ्चशा- | पू.आ. श्री जयतिलकसूरिः | ३ |
| ४ | तथा पुण्यतमं मन्त्रं जगत्त्रि- | पू.आ.श्री जिनप्रभसूरि | ४ |
| ५ | स्वश्रियं श्रीमदर्हन्तः सिद्धाः | पू. आ. श्री जिनप्रभसूरि | ५ |
| ६ | परमेष्ठिनः सुरुतरू-निव | पू.आ.श्री जिनप्रभसूरि | ६ |
| ७ | प्रतिष्ठितं तमःपारे पारेवा- | पू.आ.श्री जिनप्रभसूरि | ६ |
| ८ | लोकोत्तमास्त्रिजगतीजनताशर- | पू.आ.श्री विमलचन्द्रसूरि | १० |
| ९ | अर्हन्त ईशाः सकलाश्च सिद्धा, | पू.आ.श्री वर्धमानसूरि | १२ |
| १० | ऋषभादींस्तीर्थङ्करान्, नम- | पू.आ.श्री हेमचन्द्रसूरि | १३ |
| ११ | परमेष्ठिन एतेऽत्रार्हन्तः सिद्धा- | पू.उपा.श्री चन्द्रतिलकविजय | १४ |
| १२ | विमुच्य निद्रां चरमे त्रियामा- | पू.मु. श्री रत्नमन्दिरगणि | १६ |
| १३ | स्तुवेऽहं समतावासा-न्नाली- | | १८ |
| १४ | नम्रामरेश्वरकिरीटनिविष्टशो- | | १९ |
| १५ | अर्हतस्त्रिजगद्वन्द्यान् त्रिलोके- | | २० |
| १६ | समस्त भव्यलोक पद्मबोध | | २१ |
| १७ | विशुद्धविज्ञानभरोपपन्नाः | | २२ |
| १८ | भक्तिव्यक्तिपुरस्सरं प्रणिदधे | | २२ |
| १९ | त्रैलोक्यतिलकं सन्तं, नमामि | | २४ |
| २० | सकलदेवमानवपतिमहितं, | | २५ |
| २१ | अर्हतः सकलान् वन्दे वन्दे | | २६ |
| २२ | अर्हमित्यक्षरं यस्य, चित्ते | पू.उपा. श्री यशोविजयगणि | २६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २३ | अर्हन्महानदस्य त्रिभुवनभव्य- | | २७ |
| २४ | मन्त्रपञ्चनमस्कारः, कल्पकार- | पू.मु.श्री रत्नमण्डनगणि | २८ |
| २५ | विश्लिष्यन् घनकर्मराशिम- | | २९ |
| २६ | यः सर्वदुःखदलने किल | | ३१ |
| २७ | सम्यग्वस्तुप्रत्ययनिश्चितहेतुं | | ३२ |
| २८ | प्रणम्य स्फुरत् - स्वर्णशैल- | पू.उपा.श्री आनंदघनगणि | ३४ |
| २९ | न कृष्णो न नीलो न पीतो न | | ३९ |
| ३० | अर्हत्प्रभृतिपदानां, नवकं | पू.आ.श्री हर्षचन्द्रसूरि | ४० |
| ३१ | सुरनरेन्द्रनताङ्घ्रियुतं युतं, | पण्डितकुशलविमलगणि | ४२ |
| ३२ | ॐ ह्रीँ स्फुटानाहत मूलमन्त्रं, | | ४३ |
| ३३ | मन्त्रमहोदधिममलं, स्तुत्या | | ४५ |
| ३४ | ऊर्ध्वाधोरयुतं सबिन्दुसकलं | | ४६ |
| ३५ | दिव्यचक्षुर्विशुद्धात्मा, कारु- | | ४८ |
| ३६ | कर्माष्टकारिबलनाशनतीक्ष्ण | | ४९ |
| ३७ | आराध्यं जिनपुङ्गवं गतमदं | | ५० |
| ३८ | ॐ ह्रीँ अर्हँ नमः स्मृत्वा, | | ५१ |
| ३९ | श्रीमते सिद्धचक्राद्य-बीजाय | | ५३ |
| ४० | एवं श्रीसिद्धचक्रस्या-राधको | | ५६ |
| ४१ | जैनेन्द्रमिन्द्रमहितं गतसर्वदोषं, | | ५८ |
| ४२ | सकलाभिष्टदमुत्तमं नवपदं, | | ५९ |
| ४३ | राकेशकाशघनसार पिनाकि- | | ६० |
| ४४ | सिद्ध्यन्ति कार्याणि यतोऽत्र- | | ६१ |
| ४५ | सिद्धानुद्धूतकर्म्मप्रकृतिसमुद- | | ६२ |
| ४६ | सिद्धगुणस्तुति निरतानुद्धूत | | ६४ |
| ४७ | श्रीमदमरेन्द्र मुकुटप्रघटितमणि- | | ६५ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४८ | यथा प्राणा नराधारास्तथैव | | ६६ |
| ४९ | श्रीमद् यत्पादजाताः प्रबल- | पू.मु.श्री रविसागरगणि | ६७ |
| ५० | जातिजरोरुरोगमरणातुरशोक- | | ७२ |
| ५१ | येनेन्द्रान्भुवनत्रयस्य विलस- | | ७३ |
| ५२ | चतुर्विंशश्रीमज्जिन विततवंश | पू.आ.श्री विबुधप्रभसूरि | ७५ |
| ५३ | नत्वा गुरुभ्यः श्रुतदेवतायै | पू.आ.श्री जिनप्रभसूरि | ७७ |
| ५४ | श्रीशैवेयं यादवविशालकुल- | पू.आ.श्रीसोमतिलकसूरि | ८३ |
| ५५ | नम्राखण्डलमण्डलप्रतिकल- | पू.आ.श्री जिनकीर्तिसूरि | ८५ |
| ५६ | अष्टाविंशतिभेदभिन्नगदितं, | | ८८ |
| ५७ | अर्हन्तोऽजा अथाचार्या उपा- | पू.मु.श्री रत्नचन्द्रगणि | ८९ |
| ५८ | श्रीपूज्यपादभास्वत्-पादस्पर्श | पू.मु.श्री सर्वविजयगणि | ९० |
| ५९ | आबालकालपरिपालितशुद्ध- | | ९५ |
| ६० | प्रकटितपरमार्थे शुद्धसिद्धान्त- | | ९८ |
| ६१ | जिनास्तथा सावधयश्चतुर्धा, | | ९९ |
| ६२ | ससिधवला अरिहंता, सिद्धा | पू.श्री सिद्धर्षिगणि | १०१ |
| ६३ | मोहपन्नगगरलि तिहुयणु | पू.आ. श्री जिनप्रभसूरि | १०३ |
| ६४ | कयसम्मत्तथिरत्तो, जइ वि | पू.आ.श्री देवभद्रसूरि | १०७ |
| ६५ | रागद्दोसकसाए, दुज्जयपंचि- | पू.आ.श्री देविंदसूरि | १०८ |
| ६६ | परमिट्ठि-णमुक्कारं, थुणामि | पू.आ.श्री जिनकीर्तिसूरि | १०८ |
| ६७ | सोअवसा रोतूण वि रोतुमणा | पू.आ.श्री हेमचन्द्रसूरि | १११ |
| ६८ | जम्मजर मरण भवजलहि | महाकविगुणपाल | ११३ |
| ६९ | पणयामरिंदसुंदरिधम्मेल्लुव्वे- | पू.मु.श्री गुणेपाल | ११४ |
| ७० | नमिमो अरहंतहं, उत्तम- | कविसाहारण | ११५ |
| ७१ | तियसिंद नरिंद नमंसियाण | | ११८ |
| ७२ | मणुयणाइंद सुरधरिय छत्त | | ११९ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ७३ | 'रेहाहिं को ततिहिं ? को | पू.आ. श्री जयचन्द्रसूरि | १२० |
| ७४ | अट्ठविहकम्मवियला णिट्ठिय- | | १२२ |
| ७५ | ओमिति नमो भगवओ | | १२२ |
| ७६ | वंदित्तु वद्धमाणं जिणेसरं | पू.आ.श्री जिणचंद्रसूरि | १२३ |
| ७७ | निसा-विरामंमि विबुद्धएणं, | पू.आ.श्री देवेन्द्रसूरि | १३४ |
| ७८ | उक्कोसो सज्झाओ, चउदस- | पू.आ. श्री हेमचन्द्रसूरि | १३५ |
| ७९ | मग्गे अविप्पणासो आयारे | पू.आ.श्रीभद्रजाहुसूरि | १३६ |
| ८० | अरिहाण नमो पूअं अरहंताणं | पू.आ.श्री जिनप्रभसूरि | १४७ |
| ८१ | भत्तिब्भरअमरपणयं पणमिय | पू. श्री मानतुङ्गमुनीश्वर | १५० |
| ८२ | पणमेवि पाय परमेसराण, | पू.आ.श्री जिनप्रभसूरि | १५४ |
| ८३ | ॐ नमो अरहंताणं भगवंताणं | पू.आ.श्री जिनदत्तसूरि | १५८ |
| ८४ | किं कप्पत्तरु रे अयाण चिंतइ | पू. आ. श्री जिनवल्लभसूरि | १५९ |
| ८५ | पणमिवि रिसह-जिणिंदु देव | पू.आ.श्री जिनप्रभसूरि | १६३ |
| ८६ | घणघाइकम्ममुक्का अरहंता | | १६६ |
| ८७ | इग दु-ति-ति-चउ-पण-छ- | | १६९ |
| ८८ | अरहा जाणइ सव्वं अरहा | पू.आ.स्री उद्योतनसूरि | १७१ |
| ८९ | सेसतिभवेहिं मणुएहिं, जेहिं | पू.आ.श्री रत्नशेखरसूरि | १८६ |
| ९० | अरिहं सिद्धायरिया, उज्झाया | पू.आ.श्री रत्नशेखरसूरि | १९४ |
| ९१ | जेवि य संकप्पवियप्पवज्जिया | पू.आ.श्री रत्नशेखरसूरि | १९५ |
| ९२ | उप्पन्नसन्नाणमहोमयाणं, | | १९७ |
| ९३ | जो धुरि सिरिअरिहंतमूलदृढ- | | १९७ |
| ९४ | जीयंतरंगारिजणे सुनाणे, | | १९८ |
| ९५ | तित्थयरे गयमोहे, सिद्धे | | १९९ |
| ९६ | विनयकम्मचउक्कजिणेसरे, | | १९९ |
| ९७ | विमलेसरचक्केसरी, सिरि- | | २०० |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ९८ | अरिहंतभगवंते, तित्थयरे | | २०० |
| ९९ | अन्नं च सिद्धचक्कं कहियं | | २०१ |
| १०० | अरिहं सिद्धायरिया उवज्झाया | पू.आ.श्री रत्नशेखरसूरि | २०५ |
| १०१ | अवरावर-गच्छगय-पाडि- | | २०७ |
| १०२ | सारस्वतीयं पदपद्मयुग्मं, | | २०८ |
| १०३ | नंदउ पुंडरीअ-गोयम-पमुह | | २०९ |
| १०४ | गोअम सुहम्म जंबू, पभवो | | २११ |
| १०५ | सिरिवीरजिणं सुयरह-रोहणं | पू.आ.श्री जिनप्रभसूरि | २१३ |
| १०६ | नमवि सिरिनेमिजिणनाहपय- | पू.आ.श्री मुनिरत्नसूरि | २१४ |
| १०७ | निम्महिय-मोहमाएण, कणय- | पू.आ.श्री जिनदत्तसूरि | २१८ |
| १०८ | परमपमोय पवंच पंचाणंतय- | पू.मु. श्री गुणरत्नोपाध्याय | २२१ |
| १०९ | उच्छलियविमलकिरणा दसणा | पू.मु.श्री प्रसन्नचन्द्रविजय। | २२४ |
| ११० | सिरि-नेमि-जिणेसर, पणय | | २२५ |
| १११ | असुरवरखयरसुरविसरनर- | | २२७ |
| ११२ | लोयालोयपयासय, सासयवर- | | २२९ |
| ११३ | अट्ठावीसवियप्पं मइनाणमण- | | २३१ |
| ११४ | ईसाणिंदसुरासुररायपणयपय- | | २३१ |
| ११५ | जोअणगमद्धमागह सव्व- | पू.आ.श्री धर्मघोषसूरि | २३२ |
| ११६ | गरूयउ पासजिणिंद, इंदचंद- | पू. आ. श्री जयसागरसूरि | २३४ |
| ११७ | "जय तिहुयणेक्कमंगल ! जय | पू.उपा. श्री वीरविजयगणि | २३५ |
| ११८ | पमाय गुण-ठाणु पाटणु तहिं, | पू.आ.श्री जिनप्रभसूरि | २३७ |
| ११९ | अकुलु अमूलुअ जोणी | पू.आ.श्री जिनप्रभसूरि | २३९ |
| १२० | अमरिंदनरिंदमुणिंदवंदिअं | | २४० |
| १२१ | पिण्डत्थं च पयत्थं रूवत्थं | | २४३ |

## અરિહંત પરમાત્માના સ્તોત્રપાઠનું મહત્વ શું ?

અનાદિ કાળથી આપણા આત્માએ અજ્ઞાનતાદિના કારણે જે જે પ્રવૃત્તિઓ મન-વચન-કાયાથી કરી તેના કારણે આત્માના અસંખ્ય પ્રદેશ પર આઠ કર્મોની અનંતી અનંતી કાર્મણવર્ગણા અડ્ડો જમાવીને બેઠી છે જેના કારણે જીવ દુઃખપૂર્વક સંસારમાં ભટકી રહ્યો છે. દુઃખી થઈ રહ્યો છે. આત્માની પરેશાનીનું મૂળ કર્મ બંધ છે. એવું ગુરુગમથી જાણ્યું, અનુભવ્યું. હવે ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત થવાનો ઉપાય શું ? રત્નત્રયીની આરાધના તેમાં જ્ઞાન અને ચારિત્રને સમ્યગ્ બનાવનાર સમ્યગ્દર્શન છે. જેની પ્રાપ્તિ દર્શન મોહનીયાદિ સ્વરૂપ પ્રધાનકર્મના ક્ષય આદિથી થાય અને તે અરિહંત પરમાત્માની સ્તોત્ર ભક્તિ દ્વારા થાય છે.

પ્રતિક્રમણ હેતુપ્રકાશ ગ્રંથમાં પ્રશ્ન છે. 'લોગસ્સ'નો કાઉસ્સગ્ગ વારંવાર કેમ ? તેના ઉત્તરમાં જણાવ્યું.

**अरिहंतपरमात्मस्मरण-प्रधानकर्मक्षयकारणत्वात्** – અરિહન્ત પરમાત્માનું સ્મરણ પ્રધાન કર્મક્ષયનું કારણ છે. તેથી પૂર્વના મહાપુરુષોએ પોતાના હૈયામાં પ્રભુ પ્રત્યે જાગેલા બહુમાનભાવના કારણે હૃદયમાં પ્રગટેલી સ્ફુરણાઓને અક્ષર દેહ આપી પોતાના આત્માને કર્મમુક્ત બનાવવાનો પુરુષાર્થ કર્યો છે. તો આપણે પણ તેઓની કૃતિના આલંબને આપણા આત્મામાં સમ્યગ્દર્શન પ્રાપ્ત કરી જ્ઞાનપૂર્વકના ચારિત્ર દ્વારા કર્મક્ષય સાધી આત્માને ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત બનાવવા દ્વારા આત્માનું સામ્રાજ્ય પ્રાપ્ત કરીએ.

# શાસ્ત્રસંદેશનું નવલું નજરાણું
# "પદ્યાનુક્રમણિકા સંપુટ"

- આ સંપુટમાં ચાર ભાગ છે.
- પ્રથમ ભાગમાં આગમના ૪૪ ગ્રંથો અને સંવેગરંગશાલાની પદ્યાનુક્રમણિકા છે.
- દ્વિતીય ભાગમાં પ્રાકૃતના ૩૭૩ ગ્રંથોની પદ્યાનુક્રમણિકા છે.
- તૃતીય ભાગમાં સંસ્કૃતના ૨૦૫ ગ્રંથો અને લોકપ્રકાશની પદ્યાનુક્રમણિકા છે.
- ચતુર્થભાગમાં ત્રિષષ્ટિશલાકાપુરુષચરિત્ર અને વૈરાગ્યકલ્પલતા-રતિની પદ્યાનુક્રમણિકા છે.
- આ સંપુટમાં ૭ પરિશિષ્ટો છે.
- આ સંપુટમાં ટોટલ ૬૨૬ ગ્રંથોનો સમાવેશ કરેલ છે.
- આ સંપુટમાં ટોટલ ૧,૭૭,૦૦૦ શ્લોકનો સમાવેશ કરેલ છે.
- આ સંપુટના ટોટલ ૧૫૭૦ પેજ છે.
- આ સંપુટની કિંમત ૧૮૦૦/-રૂપિયા છે.

पू.श्री सिद्धर्षिगणिविरचितः

चंद्रकेवलिचरिय-अन्तर्गतः

# १. ॥ श्रीपञ्चपरमेष्ठिस्तवः ॥

(अनुष्टुप्)

तथापि प्राणनाथ ! प्राक्, श्रुतं श्रीगुरुवक्त्रतः ।
नवकारमहामन्त्रमाहात्म्यमवधार्यताम् ॥ १

शीर्षे कुर्याः शिरस्कं च, मुखे मुखपटं तथा ।
काये च कवचं वज्रमायुधं हस्तयोर्दृढम् ॥ २

पादयोः पादरक्षां चामीभिः पञ्चपदैः क्रमात् ।
आत्मरक्षा विधातव्या, चतुश्चूलापदैस्तथा ॥ ३

शिला वज्रमयी भूमौ, वप्रो वज्रमयो बहिः ।
खातिकाङ्गारसम्पूर्णा, वप्रोद्ध्वं वज्रमण्डपः ॥ ४

कर्तव्या बाह्यरक्षेयं, दिनं प्रति निरन्तरम् ।
सङ्ग्रामे सङ्कटे मार्गे, रक्षां कुर्या विशेषतः ॥ ५

एतन्मन्त्राधिराजस्य, प्रभावाद् यान्ति दूरतः ।
चौरारि-व्याल-वेतालादिभयान्यखिलान्यपि ॥ ६

नित्यमस्माच्च जायन्ते, सम्पदो हि पदे पदे ।
तदेतद् ध्यानतो भद्रं, वर्ततां तव वर्त्मनि ॥ ७

पू.आ. श्री सिंहतिलकसूरिरचित-
श्रीमन्त्रराजरहस्यान्तर्गतार्हदादि-

## २. ॥ श्रीपञ्चपरमेष्ठिस्वरुपसन्दर्भः ॥

अर्हददेहाचार्योपाध्याय-मुनीन्द्र-पूर्ववर्णोत्थः ।
प्रणवः सर्वत्रादौ ज्ञेयः परमेष्ठिसंस्मृत्यै ॥ १

अर्हत्-सिद्धाचार्योपाध्याय-मुनित्वरुपमर्हन्तः ।
पूज्योपचारदेशकपाठकनिर्विषयचित्तत्वात् ॥ २

प्रणवः प्रागुक्तार्थो मायावर्णेऽर्हदादिपञ्चकताम् ।
अन्तश्चतुरधिविंशति जिनस्वरुपमथो वक्ष्ये ॥ ३

अर्हन्तो वर्णान्तः रेफः सिद्धाः शिरश्च सूरिरिह ।
शुद्धकलोपाध्यायो दीर्घकला साधुरिति पञ्च ॥ ४

अर्हन्तौ शशि सुविधि जिनौ सिद्धाः (द्वौ) पद्माभवासुपूज्यजिनौ
धर्माचार्याः षोडशमल्लिःपार्श्वोऽप्युपाध्यायः ॥ ५

सुव्रत नेमिसाधुस्त (धू त) त्रार्हन् चन्द्रप्रभः रुजां शान्तयै ।
सिद्धाः सिन्दूराभास्त्रैलोक्यवशीकृतिं कुर्युः ॥ ६

सिद्धाक्षररेफाकृतिर्वागबीजं वश्यमूर्ध्नि वदने वा ।
आज्ञाचक्रे वाऽरुणरोचि वश्यं तनोत्यथवा ॥ ७

आचार्याः स्वर्णनिभाः कुर्यु र्जलवह्निरिपुमुखस्तम्भम् ।
सूर्यक्षरशीर्षाकृति-दण्डहता न स्युरुपसर्गाः ॥ ८

नीलाभोपाध्यायो लाभार्थं शुक्लनीलकृद् यदि वा ।
अध्यापकार्द्धचान्द्री कलात्मलाभाय परगलके ॥ ९

कृष्णरुचः साधुजनाः क्रुरदृशोच्चाटमृत्युदाः शत्रोः ।
साध्वक्षरदीर्घकलाकृत्यङ्कुशमुद्रया हता रिपवः ॥ १०

अर्हन्नम्भः सिद्धस्तेजः सूरिः क्षितिः परे वायुः ।
साधु व्योमेत्यन्तर्मण्डल-तत्त्वानुगं सदृग्-ध्यानम् ॥ ११

'नादो' ऽर्हन्, 'व्योम' मुनिः 'कला'
ऽथसिद्धः 'शिरो-ह-रः' सूरिः ।
'ई' कार उपाध्यायो मायायां प्राग्वदुत शेषम् ॥ १२

शशिसुविधिजिनौ नादो बिन्दुमुनिसुव्रतो व्रती नेमी ।
उद्यच्चन्द्रकलान्तः सिद्धौ पद्माभ वासुपूज्यजिनौ ॥ १३

वर्णान्तः सशिरो रः षोडश सूरीश्वरास्तथेकारः
पार्श्वो मल्लिर्वाचक इदमपि न विरोधि पूर्ववदभणितम् १४

एकैकोऽर्हत् प्रभृतिः शतादि वर्णानुगोऽनिशं ध्यातः
शान्त्यादि कर्मषट्कं तनोति किन्त्वत्र दिङ्मात्रम् १६

परमेष्ठि पञ्चनिर्मित जिनमयमाचार्यमेरुमर्हन्तम्
त्रैलोक्यश्रीबीजं सर्वं ध्यायति स सर्वज्ञः १६

पू.आ. श्री जयतिलकसूरिरचित-हरिविक्रमचरित्रान्तर्गतः

## ३. ॥ श्रीपञ्चपरमेष्ठिनमस्कारः ॥

(अनुष्टुप्)

श्रीतीर्थाय नमस्तस्मै, पञ्चशाखश्रिये सदा ।
पञ्चैते वितता यस्य, शाखाः श्रीपरमेष्ठिनः ॥ १

अर्हन्तस्ते जयन्त्यत्र, निःस्नेहाः रत्नदीपकाः ।
स्पर्धां करोत्यलोकेन, येषां ज्ञानमयं महः ॥ २

सिद्धेभ्योऽपि नमस्तेभ्यो, मुक्तेभ्यो कर्मकश्मलैः ।
मूर्ध्नि चूडामणीयन्ते, लोकपुंसः सदैव हि ॥ ३

शिवङ्गतेषु सार्वेषु, शासनं धारयन्ति ये ।
पञ्चधाचारधारिभ्य, आचार्येभ्यो नमः सदा ॥ ४

उपाध्याया जयन्त्यत्र, सूत्रार्थजलराशयः ।
गृहित्वा च जलं येभ्यो, घना वर्षन्ति साधवः ॥ ५

मूलोत्तरगुणैः शुद्धं, चारित्रं पालयन्ति ये ।
सर्वेभ्योऽपि त्रिधा तेभ्यः साधुभ्यो भुवने नमः ॥ ६

पू.आ.श्री जिनप्रभसूरिविरचितः

## ४. ॥ श्रीपञ्चपरमेष्ठिनमस्कारकल्पः ॥

(अनुष्टुप्)

तथा पुण्यतमं मन्त्रं जगत्त्रितयपावनम् ।
योगी पञ्चपरमेष्ठिनमस्कारं विचिन्तयेत् ॥ १

अष्टपत्रे सिताम्भोजे कर्णिकायां कृतस्थितिम् ।
आद्यं सप्ताक्षरं मन्त्रं पवित्रं चिन्तयेद् बुधः ॥ २

सिद्धादिकचतुष्कं च दिक्पत्रेषु यथाक्रमम् ।
चूलापदचतुष्कं च विदिक्पत्रेषु चिन्तयेत् ॥ ३

त्रिशुद्ध्या चिन्तयन्नस्य शतमष्टोत्तरं मुनिः ।
भुञ्जानोऽपि स लभते चतुर्थतपसः फलम् ॥ ४

एतमेव महामन्त्रं समाराध्येह योगिनः ।
त्रिलोक्याऽपि महीयन्तेऽधिगताः परमं पदम् ॥ ५

कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च ।
अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ६

गुरुपञ्चकनामोत्था विद्या स्यात् षोडशाक्षरा ।
जपन् शतद्वयं तस्याश्चतुर्थस्याप्नुयात् फलम् ॥ ७

पू. आ. श्री जिनप्रभसूरिविरचितम्

## ५. ॥ श्रीपञ्चपरमेष्ठिस्तवनम् ॥

(अनुष्टुप्)

स्वश्रियं श्रीमदर्हन्तः सिद्धाः सिद्धिपुरीपदम् ।
आचार्याः पञ्चधाचारं वाचका वाचनां वराम् ॥ १

साधवः सिद्धिसाहाय्यं वितन्वन्तु विवेकिनाम् ।
मङ्गलानां च सर्वेषां-माद्यं भवति मङ्गलम् ॥ २

अर्हमित्यक्षरं मायाबीजं च प्रणवाक्षरम् ।
एनं नाना(ज्ञान)स्वरूपं च ध्येयं ध्यायन्ति योगिनः ॥ ३

हृत्पद्मषोडशदलं-स्थापितं षोडशाक्षरम् ।
परमेष्ठिस्तुतेर्बीजं ध्यायेदक्षरदं सदा ॥ ४

मन्त्राणामादिमं मन्त्रं तन्त्रं विघ्नौघनिग्रहं ।
ये स्मरन्ति सदैवैनं ते भवन्ति जिनप्रभाः ॥ ५

पू.आ.श्री जिनप्रभसूरिविरचितः

## ६. ॥ श्रीपञ्चपरमेष्ठिस्तवः ॥

परमेष्ठिनः सुरुतरू-निव नुतविदितत्रिविष्टपावस्थान् ।
पञ्चापि सदा पत्रान् सुमनः प्रियसौरभान् सफलमुक्तीन् ॥ १

कल्याणमयशरीरा रुचिरचतुःसङ्ख्यकान् ताः सततम् ।
सर्वक्षमाभृदग्र्या मेरव इव सन्तु हृद्यकूटा नः ॥ २

विधुरवियुक्तमविग्रह-मकर्मकं सततगतमनाकल्पम् ।
अच्युतपदेतिरूढं नभ इव संस्तौमि सिद्धिनिकुरम्बम् ॥ ३

असमानक्रममकरा मुक्तावासाः सरस्वतीनिलयाः ।
आचार्याः सज्जनदत्तरङ्गकाः सागरा इव जयन्ति ॥ ४

पान्तु विनीतागमदा अपव्यपाया अलङ्कृतसुवर्णाः ।
दर्शितनयनालीकाः शक्रा इव जययुता उपाध्यायाः ॥ ५

विरचितकेसोद्धरणो जडाशयानामपास्तकालुष्यः ।
अध्युषितो यमकाष्टं साधुगुणं कुम्भयोनिरिव जीयात् ॥ ६

परमेष्ठिपञ्चकमिदं जिनप्रभवशा(श)सनैकसर्वस्वम् ।
यः पठति निर्मलमतिः सततं शिवसौख्यमश्नुते सततम् ॥ ७

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ७. ॥ श्रीपञ्चनमस्कृतिस्तवनम् ॥

(अनुष्टुप्)

प्रतिष्ठितं तमःपारे पारेवाग्वर्त्तिवैभवम् ।
प्रपञ्चं वेदसः पञ्च-नमस्कारमभिष्टुमः ॥ १

अहो पञ्चनमस्कारः कोप्युदारो जगत्सु यः ।
संपदोऽष्टौ स्वयं धत्ते दत्तेऽनन्तास्तु ताः सताम् ॥ २

दत्तेऽनुकूल एवान्यो भुक्तिमात्रमपि प्रभुः ।
एष पञ्चनमस्कारः प्रतिलोम्येपि मुक्तिदः ॥ ३

नमस्कारनरेन्द्रस्य किमपि प्राभवं स्तुमः ।
यदीयफूत्कृतेनापि विद्रवन्ति द्विषः क्षणात् ॥ ४

सिद्धयोप्यणिमाद्यास्ता नमस्कारमधिष्ठिताः ।
अष्टषष्ट्यक्षरात्मापि यदसौ प्रणवेऽविशत् ॥ ५

शिरस्कादिधिया धीरैः स्वाङ्गदेशनिवेशिता ।
नमस्कृतेर्नवपदी कटरे वज्रपञ्जरः ॥ ६

वर्ण्यतां श्रीनमस्कारात् कार्मणं किमतोधिकम् (?) ।
यत्सम्प्रयोगतः पांशुरपि संवनयेज्जगत् ॥ ७

नमस्कारं नुमः सिद्धं यत्पदस्पर्शपूतया ।
प्रत्याच्छादितसर्वाङ्गः शान्तिमासादयेज्ज्वरी ॥ ८

नववर्णी नमस्कृत्य कृती प्रतिपदं जपेत् ।
विधत्ते विविधाऽनिघ्नविघ्नाऽविग्रहनिग्रहम् ॥ ९

कर्णिकाष्टदलाढ्ये हृत्पुण्डरीके निवेश्य यः ।
ध्यायेत्पञ्चनमस्कारं संसारं स तरेत्तराम् ॥ १०

अष्टौ कोष्टे पदेष्वस्य वर्णानालिख्य तावतः ।
कुड्यादावर्चयन् सम्यगेति शान्तेर्निशान्तताम् ॥ ११

आद्याक्षराण्यपीष्टार्थसिद्ध्यै स्युः परमेष्ठिनाम् ।
बिन्दुरप्यमृतः किं न नाशयेद्विषविक्रियाम् ॥ १२

कराङ्गुलीषु विन्यस्यार्हदादीन् ध्यानमानयन् ।
प्रत्यूहपन्नगव्यूहव्यपोहे वैनतेयति ॥ १३

गुरून् पञ्च क्रमाद् ध्यायन् मुद्रया परमेष्ठिनाम् ।
गूढप्ररूढमचिरात् कर्मग्रन्थिं विमोचयेत् ॥ १४

षोडशाक्षरगान् श्रद्धापरमः परमेष्ठिनः ।
प्राणी प्रणिदधानोप्यौपवस्तुफलमेधते ॥ १५

विद्युज्जलाग्निभूपालव्यालचौरारिमारिजम् ।
भयं वञ्चयते पञ्च नमस्कारस्य संस्मरन् ॥ १६

आराध्य विधिवत्पञ्च नमस्कारमुदारधीः ।
लक्षजापेन पापेन मुक्तमार्हन्त्यमश्नुते ॥ १७

ऐहिकं फलमीप्सूनामष्टकर्मप्रसाधिनी ।
मुक्त्यर्थिनां च स्यादेषैवाष्टकर्मनिषेधिनी ॥ १८

विपदामभिचारस्योपादानस्याखिलश्रियाम् ।
स्मर्ता नमस्कृतेः स्वर्गिवर्गेण वरिवस्यते ॥ १९

चतुर्दशानां पूर्वाणामेषैवोपनिषत्परा ।
आद्या सकलविद्यानां बीजानां प्रकृतिः परा ॥ २०

इदं पथ्योदनं पथ्यं परलोकाध्वयायिनाम् ।
परमास्त्रं नृणां मोहराजयुद्धाय सज्जताम् ॥ २१

प्राणी प्राणप्रयाणस्य क्षणे ध्यायन्नमस्क्रियाम् ।
लभते सुगतिं नैकान् पाप्मनः कृतपूर्व्यपि ॥ २२

नमस्कृतिं कृपावित्तैः श्रोत्रयोः प्राभृतीकृताम् ।
स्वीकृत्य पुण्यसन्ध्यां च तिर्यञ्चोपि ययुर्दिवम् ॥ २३

त्रिदण्डिनं निगृह्याऽसियष्टिना श्रेष्ठिनन्दनः ।
नमस्कारस्य महसाऽसाधयत्स्वर्णपूरुषम् ॥ २४

स्मृत्वा पञ्च नमस्कारं प्रविष्टायास्तमोगृहम् ।
घटन्यस्तो महासत्याः पन्नगः पुष्पमाल्यभूत् ॥ २५

नमस्कारेण सम्बोध्य मातुलिङ्गवनामरम् ।
प्राणत्राणं स्वपरयोर्व्यधत्त श्राद्धपुङ्गवः ॥ २६

यक्षतां हुण्डिकः प्रापत् सुकुलं चण्डपिङ्गलः ।
इतस्तादृक् गुणस्फीतिं सुदर्शनः सुदर्शने ॥ २७

एष माता पिता स्वामी गुरुर्नेत्रं भिषक् सखा ।
प्राणस्त्राणं मतिर्दीपः शान्तिः पुष्टिर्महन्महः ॥ २८

निधयः सन्निधौ कामधेनुरप्यनुगामिका ।
भूभृतो भृतकास्तस्य यस्य नैष हृदो हिरुक् ॥ २९

नास्येयत्तां प्रभावाणां क्रमवर्ति तया गिराम् ।
मितायुष्ट्वाच्च सर्वोपि न्यक्षेण भणितुं क्षमः ॥ ३०

सर्वावस्थोचितं सर्वश्रुतसारं सनातनम् ।
परमेष्ठिमहामन्त्रं भक्तितन्त्रमुपास्महे ॥ ३१

उच्चैर्योजन-लक्षमानविदितो बिभ्रत्सुवर्णात्मतां
भव्यानन्दनभद्रशालमहिमा रोचिष्णुचूलाञ्चितः ।
अस्तु श्रीजिनगेहभास्वररुचिस्थानं लसन्निर्जरः
सोयं वः परमेष्ठिपञ्चकनमस्कारः सुमेरुः श्रिये ॥ ३२

(शार्दूलविक्रीडित)

साम्नायावयवां जिनप्रभगुरुर्यां सूत्रयामासिवान्
दिव्यां पञ्चनमस्कृतिस्तुतिमिमामानन्दनन्दन्मनाः ।
यस्यैषाञ्चति कण्ठसीमनि सदा मुक्ता लताविभ्रमं
तं मुञ्चत्यचिरेण विघ्ननिचयाः श्लिष्यन्ति च श्रीभराः ॥ ३३

(शार्दूलविक्रीडित)

पू.आ.श्री विमलचन्द्रसूरिविरचितम्

## ८. ॥ श्रीपञ्चपरमेष्ठिस्तोत्रम् ॥

(वसन्ततिलका)

लोकोत्तमास्त्रिजगतीजनताशरण्याः
पुण्यप्रभावपरमाः परमेष्ठिनो मे ।
तीर्थेशसिद्धगुरुवाचकसाधुमुख्याः
सौख्याय मङ्गलमहोदयदानदक्षाः ॥ १

उच्चैरशोकचमरामरपुष्पवृष्टि-
सिंहासनध्वनिविशेषसितातपत्रैः ।
भामण्डलेन वरदुन्दुभिना सनाथ-
स्ते मङ्गलाय भविनां भुवि तीर्थनाथाः ॥ २

आनन्दमन्दिरचिदात्मपरस्वरूपा
रूपाद्युपाधिरहिता भवहेतुमुक्ताः ।
मुक्ताफलोज्ज्वलतराः परमात्मराज-
स्ते मङ्गलाय भविनां भुवि सिद्धभाजः ॥ ३

सद्भूतलक्षणगणागुणमेढिभूता
भूतावबोधकृततीर्थकरानुकाराः ।
सूत्रार्थसार्थपरमार्थविदो गभीरा-
स्ते मङ्गलाय भविनाम्भुवि सूरिवीराः ॥ ४

आचार्यवर्यपदवीयुवराजकल्पाः
सज्ज्ञानदर्शनयुताजितमोहशल्याः ।
सूत्रादितन्त्रमणिरोहणभूधरेन्द्रा
स्ते मङ्गलाय भविनाम्भुवि वाचकेन्द्राः ॥ ५

शीलाङ्गतुङ्गरथधूर्वहणे धुरीणाः
स्वाध्यायसंयमसमाधिविधिप्रवीणाः ।
दुर्वारमारकरिकुम्भविभेदसिंहा-
स्ते मङ्गलाय भविनाम्भुवि साधुसिंहाः ॥ ६

तीर्थेश्वराः क्रमविनम्रहरिप्रवीराः
सिद्धाश्च सिद्धिललनोरुललामहीराः ।
आचार्यवाचकवरा जगदर्च्यपादाः
सत्साधवश्च मयि सन्तु कृतप्रसादाः ॥ ७

पठत पठत सन्तः सन्ततं भक्तिमन्तः
परमिहपरमेष्ठि-स्तोत्रमेतत्पवित्रम् ।
सततमनवबोधे येन वः सिद्धिसौधे ।
महति विमलचन्द्र-श्रीमति स्यान्निवासः ॥ (मालिनी) ८

पू.आ.श्री वर्धमानसूरिविरचित-

आचारदिनकर-अर्न्तगतम्

## १. ॥ श्रीपञ्चपरमेष्ठिनमस्कारस्तोत्रम् ॥

अर्हन्त ईशाः सकलाश्च सिद्धा, आचार्यवर्या अपि पाठकेन्द्राः
मुनीश्वराः सर्वसमीहितानि,
कुर्वन्तु रत्नत्रययुक्तिभाजः ॥ (उपजाति) १

विश्वाग्रस्थितिशालिनः समुदयासंयुक्तसन्मानसा-
नानारुपविचित्र-चित्र-चरिताः सन्त्रासितान्तर्द्विषः ।
सर्वाध्वप्रतिभासनैककुशलाः, सर्वै र्नताः सर्वदा
श्रीमत्तीर्थकरा भवन्तु भविनां व्यामोहविच्छित्तये (शार्दूल) ॥२

यद्दीर्घकालसुनिकाचितबन्धबद्ध-
मष्टात्मकं विषमचारमभेद्य-कर्म ।
तत्सन्निहत्य परमं पदमापि यैस्ते
सिद्धा दिशन्तु महतीमिह कार्यसिद्धिम् (वसंततिलका) ॥ ३

विश्वस्मिन्नपि विष्टपे दिनकरीभूतं महातेजसा
यैरर्हद्भिरितेषु तेषु नियतं मोहान्धकारं महत् ।
जातं तत्र च दीपतामविकलां प्रापुः प्रकाशोद्गमा-
दाचार्याः प्रथयन्तु ते तनुभृतामात्मप्रबोधोदयम्(शार्दूल) ॥ ४

पाषाणतुल्योऽपि नरो यदीयप्रसादलेशाल्लभते सर्पाम् ।
जगद्धितः पाठकसञ्चयः स
कल्याणमालां वितनोत्वभीक्ष्णाम् ॥ ५

संसार-नीरधिमवेत्य दुरन्तमेव,
यैः संयमाख्यवहनं प्रतिपन्नमाशु ।
ते साधकाः शिवपदस्य जिनाभिषेक,
साधुव्रता विरचयन्तु महाप्रबोधम् ॥ ६

पू.आ.श्री हेमचन्द्रसूरिविरचित-
त्रिषष्टिशलाकापुरुषचरित्रान्तर्गतम्

## १०. ॥ श्रीपञ्चनमस्कारस्तोत्रम् ॥

(अनुष्टुप्)

ऋषभादींस्तीर्थङ्करान्, नमस्याम्यखिलानपि ।
भरतैरावतविदेहाऽर्हतोऽपि नमाम्यहम् ॥ १

तीर्थकृद्भ्यो नमस्कारो देहभाजां भवच्छिदे ।
भवति क्रियमाणः स बोधिलाभाय चोच्चकैः ॥ २

सिद्धेभ्यश्च नमस्कारं भगवद्भ्यः करोम्यहम् ।
कर्मौघोऽदाहि यै ध्यानाग्निना भवसहस्रजः ॥ ३

आचार्येभ्यः पञ्चविधाऽऽचारेभ्यश्च नमो नमः ।
यै धार्यते प्रवचनं भवच्छेदे सदोद्यतैः ॥ ४

श्रुतं बिभ्रति ये सर्वं शिष्येभ्यो व्याहरन्ति च ।
नमस्तेभ्यो महात्मभ्य उपाध्यायेभ्य उच्चकैः ॥ ५

शीलव्रतसनाथेभ्यः साधुभ्यश्च नमो नमः ।
भवलक्ष-सन्निबद्धं पापं निर्णाशयन्ति ये ॥ ६

पू.उपा.श्री चन्द्रतिलकविरचितः

श्रीअभयकुमारचरितान्तर्गतः

## ११. ॥ श्रीपञ्चपरमेष्ठिस्तवः ॥

(अनुष्टुप्)

परमेष्ठिन एतेऽत्रार्हन्तः सिद्धाश्च सूरयः ।
उपाध्याया मुनिश्रेष्ठा इति पञ्च भवन्त्यहो ! ॥ १

अर्हन्तः प्रातिहार्याद्यां, पूजामर्हन्ति तामिति ।
विख्याता अरिहन्तारः, कर्मारिहननात् पुनः ॥ २

तथा भवन्त्यरुहन्तः, कर्मबीजौघदाहतः ।
सर्वकर्मक्षयात् सिद्धाः, पञ्चदशभिदा इति ॥ ३

स्त्रीस्वान्यगृहिलिङ्गैकतीर्थतीर्थङ्करेतरः
पुंषण्ढानेकप्रत्येकस्वयंबुद्धान्यबोधिताः ॥ ४

ज्ञान-दर्शन-चारित्र-तपो-वीर्यस्वरूपकैः ।
आचारैः पञ्चभिर्युक्ता, आचार्या अनुयोगिनः ॥ ५

उपाध्यायाः सदा शिष्यस्वाध्यायाध्ययनोद्यताः ।
क्रियासमुदयैर्मोक्षं, साधयन्तश्च साधवः ॥ ६

दिवा रात्रौ सुखे दुःखे, शोके हर्षे गृहे बहिः ।
क्षुधि तृप्तौ गमे स्थाने, ध्यातव्याः परमेष्ठिनः ॥ ७

परमेष्ठिनमस्कारः, सारः सद्धर्मकर्मसु ।
नवनीतं यथा दध्नि, कवित्वे च यथा ध्वनिः ॥ ८

भावसारं स्मृतादस्माज्ज्वलनोऽपि जलायते ।
मालायते भुजङ्गोऽपि, विषमप्यमृतायते ॥ ९

हारायते कृपाणोऽपि, सिंहोऽपि हरिणायते ।
मित्रायते सपत्नोऽपि, दुर्जनः सज्जनायते ॥ १०

अरण्यानि गृहाणीव, स्वश्चौरा अपि रक्षकाः ।
क्रूरा अपि ग्रहाः सानुग्रहाः क्षिप्रं भवन्ति च ॥ ११

जनयन्ति सुशकुनफलं कुशकुना अपि ।
दुःस्वप्ना अपि सुस्वप्ना, इव स्युरचिरादपि ॥ १२

जनन्य इव शाकिन्यो, वात्सल्यं दधतेतराम् ।
कराला अपि वेताला, जायन्ते जनका इव ॥ १३

दुर्मन्त्र-तन्त्र-यन्त्रादिप्रयोगः प्रभवेन्न च ।
कियद् घूका विजृम्भते, सहस्रकिरणोदये ॥ १४

अत एव महामन्त्र, एषः स्मर्येत कोविदैः ।
जागरे शयने स्थाने, गमने स्खलने क्षुते ॥ १५

इह लोकेऽर्थ-कामाद्या, नमस्कारप्रभावतः ।
परत्र सत्कुलोत्पत्तिः, स्वर्गः सिद्धिश्च जायते ॥ १६

पू.मु. श्री रत्नमन्दिरगणिविरचितः
उपदेशतरङ्गिणी-अन्तर्गतः

## १२. ॥ श्रीपञ्चपरमेष्ठिस्तवः ॥

(उपजाति)

विमुच्य निद्रां चरमे त्रियामा-यामार्धभागे शुचिमानसेन ।
दुष्कर्मरक्षोदमनैकदक्षो ध्येयस्त्रिधा श्रीपरमेष्ठिमन्त्रः ॥ १

किमत्र मन्त्रौषधि-मूलिकाभिः,
किं गारुड-स्वर्ग-मणीन्द्रजालैः ।
स्फुरन्ति चित्ते यदि मन्त्रराज-पदानि कल्याण-पद-प्रदानि ॥२

श्रीमन्नमस्कार-पदानि सर्व-सिद्धान्तसाराणि नवापि नूनम् ।
आद्यानि पञ्चातिमहान्ति तेषु, मुख्यं महाध्येयमिहामनन्ति ॥३

पञ्चतायाः क्षणे पञ्च, रत्नानि परमेष्ठिनाम् ।
आस्ये ददा(धा)ति यस्तस्य, सद्गतिः स्याद् भवान्तरे ॥ ४
(अनुष्टुप्)

पञ्चादौ यत्पदानि त्रिभुवनपतिभिर्व्याहृता पञ्चतीर्थी,
तीर्थान्येवाष्टषष्टिर्जिनसमय-रहस्यानि यस्याक्षराणि ।
यस्याष्टौ सम्पदश्चानुपममतमहासिद्धयोऽद्वैत शक्ति-
र्जीयाल्लोकद्वयस्याभिलषित-फलदः 'श्रीनमस्कारमन्त्रः' ॥ ५
(स्रग्धरा)

भोअणसमए सयणे, विबोहणे पवेसणे भए वसणे ।
पंच-नमुक्कारं खलु, समरिज्जा सव्वकालं पि ॥ (आर्या) ६

याताः प्रयान्ति यास्यन्ति, पारं संसार-वारिधेः ।
परमेष्ठि-नमस्कारं, स्मारं स्मारं घना जनाः ॥ (अनुष्टुप्) ७

स्वस्यैकच्छत्रतां विश्वे, पापानि विमृशन्तु मा ।
अघमर्षण-मन्त्रेऽस्मिन्, सति श्रीजिन-शासने ॥(अनुष्टुप्) ८

सिंहेनेव मदान्ध-गन्धकरिणो मित्रांशुनेव क्षपा-
ध्वान्तौघो विधुनेव तापततयः कल्पद्रुणेवाधयः ।
ताक्ष्येंणेव फणाभृतो घनकदम्बेनेव दावाग्नयः,
सत्त्वानां परमेष्ठिमन्त्रमहसा वल्गन्ति नोपद्रवाः ॥(शा.वि.) ९

सङ्ग्राम-सागर-करीन्द्र-भुजङ्ग-सिंह-
दुर्व्याधि-वह्नि-रिपु-बन्धन-सम्भवानि ।
चौर-ग्रह-भ्रम-निशाचर-शाकिनीनां,
नश्यन्ति पञ्च - परमेष्ठि-पदैर्भयानि ॥ (वसन्ततिलका) १०

ध्यातोऽपि पापशमनः परमेष्ठि-मन्त्रः,
किं स्यात्तपःप्रबलितो विधिनार्चितश्च ।
दुग्धं स्वयं हि मधुरं क्वथितं तु युक्त्या,
सम्मिश्रितं च सितया वसुधा-सुधेव ॥ (वसन्ततिलका) ११

आकृष्टिं सुर-सम्पदां विदधती मुक्ति-श्रियो वश्यता-
मुच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ।
स्तम्भं दुर्गमनं प्रति प्रयततां मोहस्य सम्मोहनं,
पायात् पञ्च नमस्क्रियाक्षरमयी साराधना देवता ॥(शा.वि.)१२

यो लक्षं जिनबद्ध-लक्ष्य-सुमनाः सुव्यक्त-वर्णक्रमः,
श्रद्धावान् विजितेन्द्रियो भवहरं मन्त्रं जपेच्छ्रावकः ।

पुष्पैः श्वेत-सुगन्धिभिश्च विधिना लक्ष-प्रमाणैर्जिनं,
यः सम्पूजयते स विश्वमहितः श्रीतीर्थराजो भवेत् ॥(शा.वि.)१३

स्वस्थाने पूर्णमुच्चारं, मार्गे चार्धं समाचरेत् ।
पादमाकस्मिकातङ्के, स्मृतिमात्रं मरणान्तिके ॥ (अनुष्टुप्) १४

## १३. ॥ श्रीपञ्चपरमेष्ठि-स्तोत्रम् ॥

(अनुष्टुप्)

स्तुवेऽहं समतावासा-न्नालीकासनमन्थरान् ।
अजनाभिभवद्रोहान् भक्तितः परमेष्ठिनः ॥ १

हृद्यपद्मा विभावर्य-वपुषः कौमुदप्लुषः ।
देयासु मे दुरध्वान्त-दायिनः शमिना जिनाः ॥ २

अत्रासा सर्वदा रामा-पयोधरहिताऽवतात् ।
मुक्तावलीतरस्त्रात-तापवर्गा गुणोज्ज्वला ॥ ३

जातरूपरुचः सूरीन् बहुधातुरसंश्रितान् ।
सानुयोगरुचीन् वन्दे कलधौतक्षमाभृतः ॥ ४

व्यूढाऽसमलता नाना-श्रुतपाठाऽवियोगिनः ।
महाऽऽरामा उपाध्यायाः पान्तु वो भ्रमरोचिताः ॥ ५

निर्वेदाऽस्तरसानूनमघोनावर्णितक्रमाः ।
स्वस्था गीःपतयोऽवन्तु साधवोऽङ्गिरसेहिताः ॥ ६

सकलं कार्त्तिकेऽयस्य प्रसादं पिप्रतः शिवाः ।
सत्सर्वमङ्गलाः पञ्च पुनन्तु परमेष्ठिनः ॥ ७

सा पद्मलाञ्छनकरा पुंसां विधुरतापिनी ।
कामस्य जननी भूयाद् भूत्यै पञ्च नमस्कृतिः ॥ ८

## १४. ॥ श्रीपञ्चपरमेष्ठिस्तवनम् ॥

(वसन्ततिलका)

नम्रामरेश्वरकिरीटनिविष्टशोण-
रत्नप्रभापटल-पाटलिताङ्घ्रिपीठाः ।
'तीर्थेश्वराः,' शिवपूरीपथसार्थवाहा,
निःशेषवस्तुपरमार्थविदो जयन्ति ॥ १

लोकाग्रभागभुवना भवभीतिमुक्ताः,
ज्ञानावलोकितसमस्तपदार्थसार्थाः ।
स्वाभाविकस्थिरविशिष्टसुखैः समृद्धाः,
'सिद्धा'विलीन-घनकर्ममला जयन्ति ॥ २

आचारपञ्चकसमाचरणप्रवीणाः,
सर्वज्ञशासनधुरैकधुरन्धरा ये ।
ते 'सूरयो'दमितदुर्दमवादिवृन्दा,
विश्वोपकारकरणप्रवणा जयन्ति ॥ ३

सूत्रं यतीनतिपटुस्फुटयुक्तियुक्तं,
युक्ति-प्रमाणनयभङ्गगमैर्गभीरम् ।
ये पाठयन्ति वरसूरिपदस्य योग्या-
स्ते'वाचका'श्चतुरचारुगिरो जयन्ति ॥ ४

सिद्ध्यङ्गनासुखसमागमबद्धवाञ्छाः,
संसारसागरसमुत्तरणैकचित्ताः ।
ज्ञानादिभूषणविभूषितदेहभागा,
रागादिघातरतयो 'यतयो' जयन्ति ॥ ५

## १५. ॥ श्रीपञ्चपरमेष्ठिस्तवनम् ॥

(अनुष्टुप्)

अर्हतस्त्रिजगद्वन्द्यान् त्रिलोकेश्वरपूजितान् ।
त्रिकालभावसर्वज्ञान् त्रिविधेन नमाम्यहम् ॥ १

सर्वजगदर्चनीयान् सिद्धान् लोकाग्रसंस्थितान् ।
अष्टविधकर्ममुक्तान् नित्यं वन्दे शिवालयान् ॥ २

पञ्चविधाचाररतान् व्रतसंयमनायकान् ।
आचार्यान् सततं वन्दे शरण्यान् भवदेहिनाम् ॥ ३

द्वादशाङ्गोरुपूर्वाख्य-श्रुतसागरपारगान् ।
उपदेष्टॄनुपाध्यायानुभयोः सन्ध्ययोः स्तुमः ॥ ४

निर्वाणसाधकान् साधून् सर्वजीवदयापरान् ।
व्रतशीलतपोयुक्तान् वन्दे सद्गतिकाङ्क्षिणः ॥ ५

एवं पञ्चनमस्कारः, सर्वपापप्रकाशनः ।
मङ्गलानां च सर्वेषां, प्रथमं भवतु मङ्गलम् ॥ ६

# १६. ॥ श्रीपञ्चपरमेष्ठिस्तोत्रम् ॥

(पञ्चचामर)

समस्त भव्यलोक पद्मबोध दान भास्करं,
विलोक लोक रुप्यरुपि वस्तु चक्र देशकम् ।
निहत्य काम मोहिनीं ततिं गतं जिनेन्द्रतां,
नमामि तीर्थनायकं नतैस्सुराधिपैर्जिनम् ॥ १

विधौतं कर्म पङ्कराशि प्राप्त मुक्ति वेश्मकम्,
स्वनन्त नित्य वासि सच्च-तुष्टयादि धारकम् ।
असङ्ख्यकै र्गुणैर्युतं, प्रतिष्ठितं जनैर्भुवां,
नमामि सिद्ध बुद्धमच्चर्यमक्षत स्थितं मुदा ॥ २

सदैव शुद्ध धर्मदं, जिनेन्द्र तुल्यकीर्त्तितं,
य इन्द्रियाश्वपञ्चकं वशीकरोति सत्वरम् ।
मुनीन्द्र सर्व सद्गुणैर्विशुद्ध कोटिभिर्युतं,
नमामि सूरिशेखरं समस्त गच्छ नायकम् ॥ ३

सदाङ्ग पाठ धारिणं मुनीन्द्र सार्थदायिनं,
समस्त गच्छ सारकारं मोहराड्विनाशकम् ।
गणेश पट्टयोग्यमूर्ति लोकचक्र सेवितं-
कुबोधदाववारिदं, नमामि शुद्धपाठकम् ॥ ४

त्रिकैः शिवाध्वसाधने, सुबद्धमानसं सदा,
चतुर्विधेश धर्मदं, दशप्रकारधर्मिणम् ।
विनष्टकाममोहमान-शान्तदान्तमूर्तिकं,
स्तुवे प्रमादलोपकं, मुनिगणैस्सदा युतम् ॥ ५

## १७. ॥ श्रीपञ्चपरमेष्ठिस्तोत्रम् ॥

(उपजाति)

विशुद्धविज्ञानभरोपपन्नाः परोपकारप्रवणा जनेभ्यः ।
कुर्वन्ति ये धर्मपथप्रदानं, जयन्तु ते तीर्थङ्कराः पृथिव्याम् ॥१

अनेकजन्मार्जितपापपङ्कं, प्रक्षाल्य भावेन जलोज्ज्वलेन ।
महोदयस्थानमपूर्वरुपं, गतशरण्या मम सिद्धदेवाः ॥ २

जिनेन्द्रदेवादिमपुत्रकल्पा, अनल्प-वीर्यार्जित मुक्तिकल्पाः ।
आचार्यवर्याः शुभधर्मचर्याः शुभाय भुयासुरदोषधुर्याः ॥ ३

सिद्धान्तवार्द्धेः परिमन्थयत्नाः गृहिततत्त्वार्थ महार्घ्यरत्नाः ।
तद्दीप दानार्जितभूरिपुण्या, जयन्तूपाध्यायवराः सुपुण्याः ॥४

तपः कृशाङ्गाः कृतधर्मसङ्गा, महाव्रता-रामधृतप्रसङ्गाः ।
निष्कारणं भव्यसखा मुनीन्द्राः
कल्याणमार्गाभिमुखा जयन्ति ॥ ५

## १८. ॥ श्रीपञ्चपरमेष्ठिस्तवः ॥

(शार्दूलविक्रीडित)

भक्तिव्यक्तिपुरस्सरं प्रणिदधे विस्तिर्णमोहोदधे-
र्निस्तीर्णान् परमेष्ठिनः कृततमस्त्रासान् प्रकाशात्मनः ।
पञ्चाऽप्युच्चतरान् क्षमाधरवरान् निस्तुल्यकल्याणकान्
प्रीतिस्फीतिनिबन्धनं सुमनसां तन्मन्दरागोत्तमान् ॥ १

अर्हन्तः स्वपरार्थसम्पदुदयप्रादुर्भवद्वैभवाः
स्तोतव्या जगतां गतान्धतमसः प्राणिप्रमाणीकृताः ।

सन्मार्गे प्रथमप्रधानवचनव्यालुप्तमिथ्यापथाः
भूयांसुर्भविनां भवाधिशमना देवाधिदेवाः श्रिये ॥ २

आहु र्यान् सुकृतस्य सर्वकृतिनामैकान्तिकात्यन्तिकं
सिद्धानन्तचतुष्टयं फलमपव्याधिच्छिताधिध्रुवम् ।
.........विशेषशेखरसमं व्याबाधया बाधितं
सिद्धाः सिद्धिपदं सतां विदधतां ते सङ्गतं सन्ततम् ॥ ३

आचाराचरणं सतां वितरणं सत्शेमुषीसम्पदां
दोषाणां विनिवर्तनं गुणततेर्निर्वर्तनं निःस्पृहम् ।
तीर्थाधीशकृतपृथुप्रवचनप्रोद्भासनं प्रत्यहं
कुर्वाणाः स्मरबाणभङ्गनिपुणास्ते सूरिसूराः श्रिये ॥ ४

सम्यग्दर्शनबोधसंयमसमाधानप्रधानप्रभा-
भूयः शिष्यसमुहसङ्गतमतिव्युत्पत्तिसद्विक्रमाः ।
श्रीमद्वाचकपुङ्गवाः शुभतरोदर्क्काः कुतर्कातिगाः
सूत्रार्थोभयवेदिनः प्रतिदिनं पुष्णन्तु पुण्योदयम् ॥ ५

ज्ञानाद्यैः शिवसाधकाः प्रतिपदं व्यापादका विद्विषां
सम्पन्नाः श्रुतसम्पदां प्रतिपदा पापापदानन्ददाः ।
गङ्गातुङ्गतरङ्गसङ्गतगुणश्रेणिमणिसिन्धवः
सान्निध्यं शुभसंयमाध्वनि सदा तन्वन्तु वः साधवः ॥ ६

पञ्चाचाररमाविलासरसिकाः पञ्चप्रमादद्विषः
पञ्चज्ञानमयाः प्रपञ्चविमुखाः पञ्चव्रताप्तोदयाः ।
दृप्यत् पञ्चहृषीककुञ्जरघटाः पञ्चत्वपञ्चाननाः
पञ्च श्रीपरमेष्ठिनः प्रणमतां पुष्णन्तु नः सम्पदम् ॥ ७

सम्यग्ध्येयशिरोमणिं दिनमणिं विष्वक्तमस्त्रासने
सर्वाभीष्टपरम्परावितरणे चिन्तामणिं प्राणिनाम् ।
श्रुत्वा श्रीपरमेष्ठिपञ्चकमहं सिद्ध्यर्थमभ्यर्थये
भूयो भक्तिः भवे भवे मम भवेत् तद्ध्यानलीनं मनः ॥ ८

## १९. ॥ श्रीपञ्चपरमेष्ठिस्तवनम् ॥

(अनुष्टुप्)

त्रैलोक्यतिलकं सन्तं, नमामि परमेष्ठिनम् ।
सर्वाङ्गसुन्दरं मार-हारिणं मङ्गलाऽलयम् ॥ १

समस्तशुद्धसाकारं, सहस्राष्टसुलाञ्छनम् ।
तितिक्षया विराजन्तं, दुष्टकर्मनिवर्त्तकम् ॥ २

तपोऽभिवर्द्धिततनुं, शुभध्यानपरायणम् ।
अज्ञानमर्महन्तारं, शोभनज्ञानधारिणम् ॥ ३

शोभनाष्टप्रतीहारं, भव्यजीवोपजीवनम् ।
प्रमादवादहर्त्तार-मनन्तगुणमण्डितम् ॥ ४

अशुद्धयोगभेत्तारं, नमामि सिद्धपण्डितम् ।
विशिष्टगुणसंभारं, समस्तरिपुनाशकम् ॥ ५

सुभानुकोटिभास्करं भवाब्धितारकं वरं,
विकारदृष्टिमोचकं सुजैनधर्ममण्डनम् ।
समस्तपापखण्डकं विशिष्टशर्मदायकं,
नमामि शान्तलोचनं वरेण्यसंघनायकम् ॥ (पञ्चचामर) ६

पाठकश्रीहीरानन्दचन्द्रशिष्यरामचन्द्रेणप्रणीता

## २०. ॥ श्रीपरमेष्ठिमन्त्रस्तुतिः ॥

सकलदेवमानवपतिमहितं,
विगतरोधबोधबलसहितम् ।
अतिशयितोदितमहसा कलितं,
नौमि जिनं योगिमतिफलितम् ॥ (त्रिभङ्गी) १

फलिताखिलकृत्यं प्रकटितसत्यं, नित्यमनित्यं नयवशतो ।
विदितार्थैश्चिन्त्यं हतवैमत्यं, कृतसौहित्यं सर्व्वसतः ॥ १

अवमत्यात्यन्तं कर्मौघं तं, कृतसाङ्गत्यं ब्रह्मगतेः ।
संवित्यानन्त्यं सदा धरन्तं, मनसोऽचिन्त्यं शुद्धमतेः ॥ २

भवभयव्यतिरिक्तं द्वैतविविक्तं, सुखसम्पृक्तं निर्णिक्तं
सममर्थासक्तं परैरनक्तं, दोषैस्त्यक्तं सुव्यक्तम् ।
समशोभायुक्तं ध्वान्तविमुक्तं, शुभसिन्धूक्तं चरितमतं
सततोद्धृतभक्तं मतपरिषक्तं, सदाभिषक्तं परमपदे ॥ ३

मुकुलितपरपक्षं स्यात्पदलक्ष्यं, पक्षमपक्षं स्थेयांसं
जनताहितदक्षं सर्व्वसमक्षं, स्वयमत्यक्षं श्रेयांसम् ।
वाक्याञ्चितपक्षं विपदविपक्षं, बाधातक्षं तन्वानं
सदसन्निरपेक्षं सदावलक्षं, स्वं प्रत्यक्षं मन्वानम् ॥ ४

मिथ्यामलहरणं त्रिभुवनशरणं, लोकाभरणं शङ्करणं
भुवनार्चितचरणं मुक्तिवितरणं, भवसंवरणं विस्मरणम् ।
सत्कृतसंस्मरणं स्वयमस्मरणं, विगतविकरणं निर्झरणं
दृग्बोधावरणं क्षिप्त्वा युगपल्- लोकालोकव्याकरणम् ॥ ५

बाह्यं तल्पं हित्वाऽनल्पं, रुद्ध्वा मनसः सङ्कल्पं
न्यत्कृततनुशल्यं स्थिरतातल्पे, शयितमथोऽनन्तं कल्पम् ।
रत्नत्रयकन्दं परमानन्दं, विष्वग्भन्दं निःष्यन्दं
तं भगवन्तं कृत्वा कान्तं, स्थेयः शान्तं भजत हितम् ॥ ६

श्रीहीरानन्दचन्द्र-पाठकशिष्येण रामचन्द्रेण ।
भक्त्या श्रीपरमेष्ठि-मन्त्रः स्तवगोचरं नीतिः ॥ (आर्या) ७

## २१. ॥ श्रीपञ्चपरमेष्ठिस्तवनम् ॥

(अनुष्टुप्)

अर्हतः सकलान् वन्दे वन्दे सिद्धाँश्च शाश्वतान् ।
आचार्यानादराद् वन्दे वन्दे श्री वाचकानपि ॥ १

सर्वसाधूनहं वन्दे नास्ति वन्द्यमतः परम् ।
परमा पात्रता मेऽभूत् वन्द्यसर्ववस्ववन्दनात् ॥ २

तदेषां कीर्तनादस्तु कीर्तिः कल्याणमेव च ।
वचनातीतलाभं हि नामापि श्री महात्मनाम् ॥ ३

पू.उपा. श्री यशोविजयगणिकृत-
द्वात्रिंशद् - द्वात्रिंशिका-अन्तर्गता

## २२. ॥ श्रीअरिहन्तस्तुतिः ॥

(अनुष्टुप्)

अर्हमित्यक्षरं यस्य, चित्ते स्फुरति सर्वदा ।
परं ब्रह्म ततः शब्द-, ब्रह्मणः सोऽधिगच्छति ॥ १

परःसहस्राः शरदां, परे योगमुपासताम् ।
हन्तार्हन्तमनासेव्य, गन्तारो न परं पदम् ॥ २

आत्मायमर्हतो ध्यानात्, परमात्मत्वमश्नुते ।
रसविद्धं यथा ताम्रं, स्वर्णत्वमधिगच्छति ॥ ३

पूज्योऽयं स्मरणीयोऽयं, सेवनीयोऽयमादरात् ।
अस्यैव शासने भक्तिः, कार्या चेच्चेतनास्ति वः ॥ ४

सारमेतन्मया लब्धं, श्रुताब्धेरवगाहनात् ।
भक्तिर्भागवती बीजं, परमानन्दसंपदाम् ॥ ५

## २३. ॥ श्रीअर्हत्स्वरूपस्तुतिः ॥

(विषमवृत्तम्)

अर्हन्महानदस्य त्रिभुवनभव्यजनतीर्थयात्रिकदुरितम् ।
प्रक्षालनैककारणमतिलौकिककुहकतीर्थमुत्तमतीर्थम् ॥ १

लोकालोकसुतत्त्वप्रत्यवबोधनसमर्थदिव्यज्ञान-।
प्रत्यहवहत्प्रवाहं व्रतशीलामलविशालकूलद्वितयम् ॥ २

शुक्लध्यानस्तिमितस्थितराजद्राजहंसराजितमसकृत् ।
स्वाध्यायमन्द्रघोषं नानागुणसमितिगुप्तिसिकतासुभगम् ॥ ३

क्षान्त्यावर्तसहस्रसर्वदयाविकचकुसुमविलसल्लतिकम् ।
दुःसहपरीषहाख्यद्रुततररङ्गत्तरङ्गभङ्गुरनिकरम् ॥ ४

व्यपगतकषायफेनं रागद्वेषादिदोषशैवलरहितम् ।
अत्यस्तमोहकर्दममतिदूरनिरस्तमरणमकरप्रकरम् ॥ ५

ऋषिवृषभस्तुतिमन्द्रोद्रेकितनिर्घोषविविधविहगध्वानम् ।
विविधतपोनिधिपुलिनं सास्रवसंवरणनिर्जरानिःस्रवणम् ॥ ६

गणधरचक्रधरेन्द्रप्रभृतिमहाभव्यपुण्डरीकैः पुरुषैः ।
बहुभिः स्नातं भक्त्या कलिकलुषमलापकर्षणार्थममेयम् ॥ ७

अवतीर्णवतः स्नातुं ममापि दुस्तरसमस्तदुरितं दूरम् ।
व्यवहरतु परमपावनमनन्यजय्यस्वभावभावगम्भीरम् ॥ ८

पू.मु.श्री रत्नमण्डनगणिविरचितम्

श्रीसुकृतसागर–अन्तर्गतम्

## २४. ॥ श्रीनमस्कारस्तोत्रम् ॥

(अनुष्टुप्)

मन्त्रपञ्चनमस्कारः, कल्पकारस्कराधिकः ।
अस्ति प्रत्यक्षराष्टाग्रो–त्कृष्टविद्यासहस्रकः ॥ १

चौरो मित्रमहिर्माला, वह्नीर्वारि जलं स्थलम् ।
कान्तारं नगरं सिंहः, शृगालो यद् प्रभावतः ॥ २

लोकद्विष्टप्रियावश्यघातकादेः स्मृतोऽपि यः ।
मोहनोच्चाटनाकुष्टि–कार्मणस्तम्भतादिकृत् ॥ ३

दूरयत्यापदः सर्वाः, पूरयत्यत्र कामनाः ।
राज्यस्वर्गाऽपवर्गान् तु, ध्यातो योऽमुत्र यच्छति ॥ ४

श्रीपार्श्वप्रतिमापूजा – धूपोत्क्षेपादिपूर्वकम् ।
तमेकाग्रमनाः पूत – वपुर्वस्त्राऽनिशं जपेत् ॥ ५

## २५. ॥ श्रीनमस्कारमन्त्रस्तोत्रम् ॥

विश्लिष्यन् घनकर्मराशिमशनिः संसारभूमिभृतः
स्वर्निर्वाणपुरप्रवेशगमने निष्प्रत्यवायः सताम् ।
मोहान्धावटसङ्कटे निपततां हस्तावलम्बोऽर्हतां,
पायाद् वः सचराचरस्य जगतः सञ्जीवनं मन्त्रराट् ॥ १

(शार्दूलविक्रीडित)

एकत्र पञ्चगुरुमन्त्रपदाक्षराणि, विश्वत्रयं पुनरनन्तगुणं परत्र ।
यो धारयेत् किल तुलानुगतं तथापि,
वन्दे महागुरुवरं परमेष्ठिमन्त्रम् ॥ (वसन्ततिलका) २

ये केचनापि सुषमाद्यरका अनन्ता,
उत्सर्पिणीप्रभृतयः प्रययुर्विवर्त्ताः ।
तेष्वप्ययं परतरःप्रथितप्रभावो,
लब्ध्वाऽमुमेव हि गता शिवमत्र लोकाः ॥(वसन्ततिलका) ३

उत्तिष्ठन् निपतन् चलन्नपि धरापीठे लुठन् वा स्मरे-
ज्जाग्रद् वा प्रहसन् स्वपन्नपि वने बिभ्यन्निषीदन्नपि ।
गच्छन् वर्त्मनि वेश्मनि प्रतिपदं कर्म प्रकुर्वन्नमुं
यः पञ्चप्रभुमन्त्रमेकमनिशं किं तस्य नो वाञ्छितम् ॥ ४

(शार्दूलविक्रीडित)

सङ्ग्राम-सागर-करीन्द्र-भुजङ्ग-सिंह-
दुर्व्याधि-वह्नि-रिपु-बन्धनसम्भवानि ।
चौर-ग्रह-भ्रम-निशाचर-शाकिनीनां
नश्यन्ति पञ्चपरमेष्ठिपदैर्भयानि ॥ (वसन्ततिलका) ५

यो लक्षं जिनबद्धलक्ष्यहृदयः सुव्यक्तवर्णक्रमः
श्रद्धावान् विजितेन्द्रियो भवहरं मन्त्रं जपेच्छ्रावकः ।
पुष्पैः श्वेतसुगन्धिभिः सुविधिना लक्षप्रमाणैरमुं
यः सम्पूजयते स विश्वमहितस्तीर्थाधिनाथो भवेत् ॥ ६

(शार्दूलविक्रीडित)

इन्दुर्दिवाकरतया रविरिन्दुरूपः
पातालमम्बरमिला सुरलोक एव ।
किं जल्पितेन बहुना भुवनत्रयेऽपि
यन्नाम तन्न विषमं च समं च न स्यात् ॥ (वसन्ततिलका) ७

जग्मुर्जिनास्तदपवर्गपदं तदैव
विश्वं वराकमिदमत्र कथं विनाऽस्मात् ।
तत् सर्वलोकभुवनोद्धरणाय धीरै-
र्मन्त्रात्मकं निजवपुर्निहितं तदत्र ॥ (वसन्ततिलका) ८

हिंसावाननृतप्रियः परधनाऽऽहर्ता परस्त्रीरतः
किञ्चान्येष्वपि लोकगर्हितमतिः पापेषु गाढोद्यतः ।
मन्त्रेशं यदि संस्मरेच्च सततं प्राणात्यये सर्वदा
दुष्कर्माहितदुर्गतिक्षतचयः स्वर्गीभवेन्मानवः ॥ ९

(शार्दूलविक्रीडित)

(शिखरिणी)

अयं धर्मः श्रेयानयमपि च देवो जिनपति-
र्व्रतं चैतत् श्रीमानयमपि च यः सर्वफलदः ।
किमन्यैर्वाग्जालैर्बहुभिरपि संसारजलधौ
नमस्कारात्तत् किं यदिह शुभरूपं न भवति ॥ १०

स्वपन् जाग्रन् तिष्ठन्नपि पथि चलन् वेश्मनि सरन्,
भ्रमन् क्लिश्यन् माद्यन् वर-गिरि-समुद्रेष्ववतरन् ।
नमस्कारान् पञ्च स्मृतिरवनिखातानिव सदा
प्रशस्तैर्विज्ञप्तानिव वहति यः सोऽत्र सुकृती ॥ ११

## २६. ॥ श्रीनमस्कारमहामन्त्राष्टकम् ॥

(वसन्ततिलका)

यः सर्वदुःखदलने किल कल्पवृक्षः
चिन्तामणीः शुभमनोरथपूरणे सः ।
कन्दर्पदर्पदहनैकविधौ दवाग्निः
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ १

सर्वागमश्रुतसमुद्रसुधेन्दुसारः
चारित्रचन्दनवनं सदनं सुखानम् ।
कल्याणकुन्दनखनिर्दमनं दराणां
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ २

संसारसागरनिमज्जदपूर्वनौका
सिद्धौषधिर्विविधरोगविनाशने च ।
निःशेषलब्धिबलबोधतरोश्च बीजं
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ ३

सूर्यः सहस्रकिरणै र्हरति तमांसि
सिंहो यथा गजगणांश्च नखैर्निहन्ति ।
संसारवर्तिदुरितानि तथैव मन्त्रो
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ ४

पद्माकरे रुचिररश्मिभिरौषधीशः
शीघ्रं प्रबोधयति निद्रितकैरवाणि ।
अन्तः सुषुप्तगुणपद्मदलानि चैवं
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ ५

भूमण्डलेषु शुभवस्तु न विद्यते तत्
ध्यानेन यस्य ननु यन्नहि साधनीयम् ।
दुःखं न तद्भवति यस्य विनाशनं नो
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ ६

श्रीपाल-देवधरणेन्द्रसुदर्शनाद्याः
पल्लीपतिश्च शिवकम्बलशम्बलाद्याः ।
ध्यात्वा हि यं पदमगुः परमं पवित्रं
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ ७

भक्त्या दधाति हृदि यो ननु मन्त्रराजं
दिव्यां गतिं व्रजति नूतनमुक्तिमोदम् ।
चूर्णीकरोति भवसञ्चितकर्मशैलं
लोकत्रये विजयते परमेष्ठिमन्त्रः ॥ ८

## २७. ॥ श्रीनमस्कारस्तुतिः ॥

सम्यग्वस्तुप्रत्ययनिश्चितहेतुं निधाय हृदि भक्तिम् ।
अर्हद्गुणानुवादं, शिवप्रसादं सदा सेवे ॥ (आर्या) १

(पञ्चचामर)

समस्तमङ्गलास्पदं यदीयनामसंस्मृतिः,
कृतिःकृतार्थतामियाद्यदीयपर्युपासनात् ।

सुकृष्टितामवाप्नुयाद्यदीश्वरत्वधीधृति-
स्तमीश्वरं स्मराम्यहं पुराणपूरुषं जिनम् ॥ २

विरोधिधर्मसङ्गभीत्रसत्तमान् कुतीर्थिनः
सदैकधर्मवादिनो विवेकधर्मविच्युतान् ।
परान् करोति तत्तनौ विरोधिजाड्यचेतना,
गुणैः प्रदर्श्य सङ्गतावनेकधर्मवस्तुवित् ॥ ३

प्रयत्य सम्यगात्मनो विशुद्ध्यचेदृगादिषु,
त्रिषूपलभ्य निर्वृतिं परामनन्तचिद्घनाम् ।
उपायसिद्धिनिर्वृतिं सदर्थविन्न मन्यते,
सहेतुकार्थसिद्धिविज्जिनो जहास तन्मतम् ॥ ४

नयप्रमाणसाधनैर्विधाय वस्तुनः स्थितिं,
प्रतिक्षणं क्षयोद्भवध्रुवस्य धर्मधारिणीम् ।
परैः प्रदोषभाषितैरधृष्यमेतदार्हतं,
कुवासनाविनाशनं जयत्यनादिशासनम् ॥ ५

समस्तवस्तुसङ्ग्रहे यदीयवाक्यदृग्विदां,
क्रमो न चैव लभ्यते ततस्तु लौकिकीमिमाम् ।
तनूद्भवां चिदात्मजां गतिं निरीक्ष्य निश्चिता,
जिनेश्वरत्वधीर्बुधैस्तमीशमीण्महेऽन्वहम् ॥ ६

निकृत्तमोहपक्ष्मणे नमो निरीक्ष्यलक्ष्मणे,
भवोपभोगभञ्जिने विमुक्तवाससञ्जिने ।
अशेषभावभासिनेऽप्यनञ्जनाय ते नमो,
जगद्विहन्तृकर्न्तृतोज्झिताय कृत्तकर्मणे ॥ ७

अनेकमेकमक्षरं निरक्षरं निरंशकं,
सदंशमस्तिनास्तिगं सदाकृतिं निराकृतिम् ।
विरुद्धभावभञ्जनं नयद्वयस्य वस्तुनः,
स्वरूपतामितस्य भो भजे भदन्तमीश्वरम् ॥ ८

स्याद्वादनादशक्त्योत्तम्भितपरवादिवाग्भरः श्रीमान् ।
जयति जिनेशो भक्तयाभिरामचन्द्रस्सदोद्योती ॥ (आर्या) ९

पू.उपा.श्री आनन्दघनगणिविरचिता

## २८. ॥ श्रीसिद्धचतुर्विंशतिका ॥

(भुजङ्गप्रयात)

प्रणम्य स्फुरत् - स्वर्णशैलप्रभावं
प्रभापूरदूरीकृतध्वान्तभावम् ।
युगादीश्वरं लब्धविश्वस्वरूपं
स्तुवे किञ्चनाहं सुसिद्धस्वरूपम् ॥ १

न पाणिर्न पादो न मौलिर्न वक्त्रं
न वक्षो न श्रोत्रे न कर्णौ न कण्ठः ।
न चायुर्न पायुर्न कायः कषायो
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ २

न खेदो न वेदो न सेकः प्रवेगो
न कुन्दं न तुन्दं न बाहुर्न चोरुः ।
न जङ्घे न पार्श्वे न चांसौ न मांसं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ३

न रोषो न दोषो न शोषो न पोषो
न रागो न यागो न तागो न चामः ।
न यानं न पानं न दानं न लाभो
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ४

न यन्त्रं न तन्त्रं न मन्त्रं कलत्रं
न मित्रं न चित्रं न वस्त्रं न शस्त्रम् ।
न पात्रं न नात्रं न यात्रा न मात्रा
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ५

न तापो न शापो न जापो न लापो
न पापं न पुण्यं न गुण्यं हिरण्यम् ।
न कालः करालो न भालं विशालं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ६

अनङ्गो न रङ्गो न भङ्गो न चङ्गो
न चङ्गस्तुरङ्गः कुरङ्गो विहङ्गः ।
न शार्णिर्न वाणी न वेणिर्न वेणी
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ७

न ऋद्धिर्न वृद्धिर्न हानिर्न खानो
न केशो न वेशो न नाशो न पाशः ।
न नाभिः स नाभिर्न सारङ्गनाभि-
र्भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ८

न हास्यं न लास्यं न भास्यं न दास्यं
न भीतिर्न रीतिर्न गीतिर्न हीतिः ।

न भोगो न रागो वियोगः प्रयोगो
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ९

न लोभः ससंभो न दम्भो न चाम्भो
न मोहो न रोहो न द्रोहो न बोहः ।
अपायाः सहाया न माया न काया
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १०

न माला न शाला न दोला न लोला
न पीतो न भ्राता न माता पिता न ।
न शय्यातिचर्या न पद्मा न पद्मं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ ११

न सैन्यं न दैन्यं न हारः प्रहारो
न सूत्रं न मूत्रं न जग्धिः पुरीषम् ।
न रक्तं न भक्तं न धर्मो न नक्तं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १२

न नागो न हि चन्दनाद्यङ्गरागो
न कामो न कस्मिंश्चनापि प्रणामः ।
न मादो न वादो न सादः प्रसादो
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १३

न वेलापवेला न खेला न हेला
न फेला न वेला विपत्तिर्न पत्तिः ।
न दन्ता न यन्ता रथा नो न दन्तो
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १४

न कूपो न भूपो न यूपो न रूपो
न सर्पो न दर्पः प्रवीणा न वीणा ।
न शूलं न तूलं न मूलं न पूलं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १५

न निद्रा न मुद्रा न पुत्रो न पौत्रो
न बन्धुर्न शत्रुर्न सारिर्न मारी ।
कफार्तिर्न वातो न पित्तं न वित्तं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १६

न कण्ठी न पीठी न यष्टिर्न मुष्टि
र्न वंशो न दंशो न गण्डः प्रगण्डः ।
न मेषो न वेषो न सूर्यं न कूर्पं
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १७

मृषा नो तृषा नो बुभुक्षा न शिष्या
न विघ्नोत्सवामी न दण्डः प्रचण्डः ।
न चूडा न चूडामणिर्नैव पीडा
भजे तं प्रसिद्धं सदा शुद्धसिद्धम् ॥ १८

न शीतो न पीतो न तिक्तो कटुर्नो
कषायो न चाम्लो न तिग्मः ।
मृदुर्न कठोरो न रोगो न गुल्मः
श्रिये श्रीजिनेन्द्रो नतेन्द्रो जितेन्द्रः ॥ १९

न दुर्गन्धको नो सुगन्धिर्न कृष्णो
न नीलः सलीलो न बभ्रुर्न दभ्रः ।

न दीर्घो न ह्रस्वो न पीनो न दीनः
श्रिये श्रीजिनेन्द्रो नतेन्द्रो जितेन्द्रः ॥ २०

न तुङ्गो न नीचो न कुब्जो विशालो
न सान्द्रो न मन्द्रो न जीर्णो नवीनः ।
न दूरं सनीडो न पूर्णो न चान्त्यः
श्रिये श्रीजिनेन्द्रो नतेन्द्रो जितेन्द्रः ॥ २१

न मत्तः प्रमत्तिर्न लोलो न गोलो
न सव्योऽपसव्यो न गुप्तः प्रकाशः ।
ऋजुर्नो न वक्रो न वृद्धो न बालः
श्रिये श्रीजिनेन्द्रो नतेन्द्रो जितेन्द्रः ॥ २२

बाह्याऽबाह्यकर्मसंबंधतोऽमी
भावा जीवेऽनेकशः संभवन्ति ।
कर्माभावात्तन्निषेधेन सिद्धे
रम्यं किञ्चिदुक्तं सतत्त्वम् ॥ (शालिनी) २३

वीर्यस्योद्यच्छर्मणो दर्शनस्य
ज्ञानस्योच्चैर्नित्यमान्यं तमेव ।
व्यक्तीभूतं कर्मणो विषयोगाद्धत्ते
यस्तं सिद्धमीडे प्रशस्तम् ॥ (शालिनी) २४

इति किमपि च तत्स्वरूपः ततः
प्रगटनभङ्ग्या निवेशितः सिद्धः ।
आनन्दघनोदयराजतेजसा
प्रभवतु ज्ञानमयो हितः सुसिद्धः ॥ २५

# २९. ॥ श्री एकत्रिंशद्गुणनिदर्शकम् सिद्धस्तवनम् ॥

(भुजङ्गप्रयात)

न कृष्णो न नीलो न पीतो न रक्तो,
न शुक्लः सुगन्धीर्नवानीष्टगन्धो ।
न तिक्तो कटुनो कषायाम्ल गुल्य-
स्तमेवं प्रपद्ये सदा सिद्धमेकम् ॥ १

न शीतो नवोष्णो मृदु नो कठोरो,
गुरुर्नो लघु स्नेहलो नैव रुक्षः ।
न वा वर्तुलो नो चतुरास्वरुप-
स्तमेवं प्रपद्ये सदा सिद्धमेकम् ॥ २

न वा मण्डलाभक्तिर्नायतस्या-
दकायोरुहस्सङ्गहीनोऽत्रिवेद ।
य एकाधिक त्रिंशदुद्यद्गुणश्री-
स्तमेवं प्रपद्ये सदा सिद्धमेकम् ॥ ३

न कर्म्मादिमं यस्य पञ्च प्रकारं,
न वा दर्शनावारकं नन्द भेदम् ।
न वायुश्चतुर्द्धान पञ्चान्तराया-
स्तमेवं प्रपद्ये सदा सिद्धमेकम् ॥ ४

न मोहो द्विधादर्शनाचार-भेदात्,
शुभं नाशुभं नाम सातं तदन्यत् ।
न वेद्यं द्विधा गोत्रमुच्चं न नीचं,
तमेवं प्रपद्ये सदा सिद्धमेकम् ॥ ५

मतश्चैवमप्यागमे युक्त एकाधिकत्रिंशताभिर्गुणैरादितोयः ।
अनन्तज्ञानदर्शनानन्तवीर्य-स्तमेवं प्रपद्ये सदा सिद्धमेकम् ॥६

न क्रोधो न मानो न माया न लोभो,
न हास्ये न लास्ये न गीतानी यस्य ।
न नेत्रे न गात्रे जगत्रे विकार,
स एष परमात्मा गतिर्मे जिनेन्द्र ! ॥ ७

पू.आ.श्री हर्षचन्द्रसूरिविरचितम्

## ३०. ॥ श्रीनवपदस्तवनम् ॥

अर्हत्प्रभृतिपदानां, नवकं भविकं सुरागमं श्रयतात् ।
मञ्जुलचित्फलफलितं, सेव्यं दीव्यत्प्रभं तापात् ॥(आर्या) १

प्रमुदितभव्यं नुतिनव्यं पदनवकं,
निजगुणविसरणनिहततमोभर,-
मवनतजनतातपचयशमकं ॥ प्र० १

सुखमसुखमरुचिरुचिरसुमण्डल,-
मण्डितमन्त्यचतुष्टयपात्रम् ॥ प्र० २

द्विगुणितधवलिमधरधुरन्धर,-
मिन्दुनिकरसममर्हद्गात्रम् ॥ प्र० ३

शरविधुभिदयनचञ्चुमुदञ्चित,-
मितं लोहितगुणमतनुचतुष्कम् ॥ प्र० ४

सिद्धपदं बुधसुरसंसेवित,-
माश्रितदुर्मतिन्नुतनुरुष्कम् ॥ प्र० ५

उषितगणितगुणनिकरविराजित-
मूर्तिसूरिपदमधरितकनकम् ॥ प्र० ६

सकलभविकजनमानसनीरज,-
निद्रामुद्रानर्दनरविकम् ॥ प्र० ७

द्व्यधिकदशकगणिपीटकसुपाठक,-
मुपाध्यायपदमुपकृतिकलशम् ॥ प्र० ८

विमलतपोऽनलशोधितविग्रह,-
मंहस्संहतिभूधरकुलिशम् ॥ प्र० ९

समितिगुप्तिधरमतनुपरिषह,-
विधुरितदुरितं मुनिवरचरणम् ॥ प्र० १०

तपोविशे(शो)षितकर्षितमेचक,-
तनुमिह वन्दे शिवसुखकरणम् ॥ प्र० ११

मुनिरसलक्षणभेदविशुद्धं-
सम्यक्त्वं च दधामि मुदाहम् ॥ प्र० १२

सकलविशदगुणमूलं ज्ञानं,
हृदि निदधामि कलुषमलदाहम् ॥ प्र० १३

भाषित सप्ततिभेदविभिन्नं
चरणाचरणं कुरुत जना ! हे ॥ प्र० १४

पञ्चाशच्च द्वादश तपनानि,
श्रयत शिवाप्त्या इह पुण्य ! हे ॥ प्र० १५

(कलश)

पदनवकसाधनविहितविधिना पूज्य सत्करुणाकर !
तापौघहन्त्रीजल्पिताशापूर्णिमायां शिवनृप !
सिन्धूत्तमामलयशः श्रीमुच्चन्द्रसूरिभिरिड्य हे
श्रीसङ्घसुखदायुजि शितेऽब्दे खयुगनिधिविधुमे समान् ॥ १६
(हरिगीत)

॥ श्रीमत्पण्डितकीर्त्तिविमलगणिशिष्यपण्डितवीरविमलगणि-
शिष्यपण्डितकुशलविमलगणिकृतम् ।

## ३१. ॥ श्रीसिद्धचक्रस्तोत्रम् ॥

(द्रुतविलम्बितम्)

सुरनरेन्द्रनताङ्घ्रियुतं युतं, त्रिवरणातिशयात्मविभूतिभिः ।
भविकषायनिदाघनिवारकं, शुचिगिरा प्रणमामि जिनेश्वरम् ॥१

सकलविश्वविभावविवर्जितान्, परमनिर्मलतत्त्वमुपागतान् ।
अहमनन्तचतुष्टयसंयुतान्, शिवकृते हृदि सिद्धविभून् दधे ॥२

गुरुगुणर्द्धिगुरुत्वगरीयसे, भुवनभावविभासनभानवे ।
श्रुतबलाज्जनसंशयभेदिने, जिनसमाय नमो मम सूरये ॥ ३

जिनवरागमपारगमर्थयुक्-श्रुतसमर्पणतत्परमर्थिनाम् ।
ऋजुगिरं चरणादिगुणाञ्चितं, नमत वाचकमादरतो जनाः ॥ ४

सकलपापनिबन्धननिर्वृता, उपशमामृतशान्तहृदोऽमदाः ।
समितिसंयमधर्मरताः शिवं, ददतु मे मुनयः प्रतिवासरम् ॥५

सुगुरुदेवसुधर्मजिनोदितं, सकलभावरुचित्वमयं मम ।
कलशमादिभवं शुचिदर्शनं, भवतु मुक्तिसुखाय गुणालयम् ॥६

स्वपरबोधकरी सुखदायिनी, चरणहेतुरकृत्यनिवर्तिनी ।
सकलभावविकाशनकारिणी, हरतु संविदगम्यतमो मम ॥ ७

निखिलपापविरामवदेनसां, भवकलापकृतां चयरिक्तकृत् ।
सुरनरादिसुखार्पणतत्परं, भवति सच्चरणं शरणं मम ॥ ८

निचितकर्मचयेन्धनपावकं, परमलब्धिसमृद्धिसमर्पकम् ।
सकलमङ्गलमञ्जुलमन्दिरं, निजसुखाय सदाऽस्तु शुभं तपः ॥९

नवपदशुचिमन्त्रं सिद्धचक्राख्ययन्त्रं,
भजति जपति भक्त्या यः स हत्वारिवर्गम् ।
इह जगति विशाले ऋद्धिकीर्त्ती च लब्ध्वा,
व्रजति कुशलतो द्राक् सिद्धिशर्माणि वीरः ॥ (मालिनी) १०

## ३२. ॥ श्रीसिद्धचक्रस्तोत्रम् ॥

(उपजाति)

ॐ ह्रीँ स्फुटानाहत मूलमन्त्रं,
स्वरैः परीतं परितोऽस्ति सृष्ट्या ।
यत्रार्हमित्युज्ज्वलमाद्यबीजं,
श्रीसिद्धचक्रं तदहं नमामि ॥ १

सिद्धादयो दिक्षु विदिक्षु सम्यग्-
दृग्-ज्ञान-चारित्र-तपः पदानि ।
साद्यन्तबीजानि जयन्ति यत्र,
श्रीसिद्धचक्रं तदहं नमामि ॥ २

सानाहतं यत्र दलेषु वर्गा-
ष्टकं निविष्टं च तदन्तरेषु ।

सप्ताक्षरो राजति मन्त्रराजः,
श्रीसिद्धचक्रं तदहं नमामि ॥ ३

सानाहतं व्याप्तदिगष्टके यत्,
सल्लब्धिसिद्धर्षिपदावलीनाम् ।
त्रिपङ्क्तिभिः सृष्टितया परितं,
श्रीसिद्धचक्रं तदहं नमामि ॥ ४

त्रिरेखमायापरिवेष्टितं यत्,
जयाद्याधिष्ठायकसेव्यमानम् ।
विराजते सद्गुरुपादुकाकं,
श्रीसिद्धचक्रं तदहं नमामि ॥ ५

मूलग्रहं कण्ठनिधिं च पार्श्व-
द्वयस्थ-यक्षादिगणं गुणज्ञैः ।
यद् ध्यायते श्रीकलशैकरुपं,
श्रीसिद्धचक्रं तदहं नमामि ॥ ६

सद्वास्थबीजं स्फुटबीजवीरं,
सबीजदिक्पालमलं नृणां यत् ।
भूमण्डले ध्यातमभीष्टदायि,
श्रीसिद्धचक्रं तदहं नमामि ॥ ७

यत्रार्चिते यत्र नमस्कृते च,
यत्र स्तुते यत्र पुरस्कृते च ।
जना मनोवाञ्छितमाप्नुवन्ति,
श्रीसिद्धचक्रं तदहं नमामि ॥ ८

इत्यतित्रिदशगोमणिद्रुमोद्यत्प्रभावपटलं शिवप्रदम् ।
अर्हदादिसमलङ्कृतं पदैः,
सिद्धचक्रमिदमस्तु नः श्रिये ॥ (रथोद्धता) ९

## ३३. ॥ श्रीसिद्धचक्रस्वरूपस्तवनम् ॥

(आर्या)

मन्त्रमहोदधिममलं, स्तुत्या प्रणिपत्य सिद्धचक्राह्वम् ।
तद्यन्त्रस्यैव विधिं, गणधररचितस्य वक्ष्येऽहम् ॥ १

ऊष्माक्षरं चतुर्थं, सप्तमवर्गद्वितीयवर्णेन ।
अध उपरि यदाक्रान्तं, सबिन्दुसकलं सदा ध्येयम् ॥ २

प्रणवादिबीजवर्णै-स्तत्तत्त्वं वलयितं समीपस्थम् ।
पञ्चनमस्कृत्यैतत्, सत्साधकसिद्धिदं वन्दे ॥ ३

प्रथमेऽथ ततो वलये, प्रसिद्धपरमेष्ठिमन्त्रपदतत्त्वम् ।
प्रत्येकं प्रणवाद्यं, ध्यायककल्पद्रुमं नौमि ॥ ४

प्रणौमि द्वितीयवलये, श्रीगणधरसेवितं प्रभुत्वकरम् ।
पञ्चविधं स्वाचारं, सम्यग्ज्ञानाय नम आद्यम् ॥ ५

षोडश विद्यादेवी - स्तृतीयवलये स्मरामि वर्णमिषात् ।
पद्मं बहिरष्टदलं, दलान्तरेष्वष्टवर्गांश्च ॥ ६

अष्टसु दलेषु बीजा-क्षराण्यनाहतप्रवर्तीनि ।
वर्गांश्च मातृकाया, ध्यायामोऽनाहतं चान्ते ॥ ७

अथ रेखात्रयवृत्तं, तत्परिधौ चक्रमानम् ॐ ह्रीँ ।
अर्हत्-सिद्धगुरुणां तथा च परमगुरोः सुकल्याणी ॥ ८

अदृष्टानन्तयोर्गुर्वो-रनन्तानन्तसद्गुरोः ।
गणभृत् सिद्धचक्रस्य, सबीजानाहतपादुकाः ॥ ९

तस्मादथ रेखाद्वय-वृत्तं कलशानुकारि सद्यन्त्रम् ।
तन्मूले ग्रहनवकं, विघ्नहरं भव्यसत्त्वानाम् ॥ १०

कुम्भस्य च स्थितान् कण्ठे, चिन्तयामि निधीन् नव ।
दिक्पालान् बहिरिन्द्राद्यान्, स्वस्वस्थानस्थितान् मुदे ॥ ११

(अनुष्टुप्)

ततो लकारमूर्ध्वाध-स्तटयोरुभयोर्बहिः ।
सिद्धचक्रमिदं यन्त्रं, ध्यायतां कल्पितप्रदम् ॥ १२

स्तम्भे पीतं सितं शान्तौ, विद्वेषे धूमसन्निभम् ।
वश्ये रक्तं शिवेऽभ्राभं, खेचरत्वे मणिप्रभम् ॥ १३

ज्ञात्वा गुरुमुखाद् ध्यानं, षट्कर्मसु यथोचितम् ।
त्यजन् निन्द्यं भजन् वन्द्यं, ध्याता कुर्यान्निरन्तरम् ॥ १४

## ३४. ॥ श्रीसिद्धचक्रस्तोत्रम् ॥

ऊर्ध्वाधोरयुतं सबिन्दुसकलं ब्रह्मस्वरावेष्टितं,
वर्गापूरितमष्टपत्रममलं सत्सन्धितत्त्वार्पितम् ।
अन्तःपत्रतटेष्वनाहतपदं, ह्रीँकारसंवेष्टितं,
देवं ध्यायति यः पुमान् स भवति, वैरीभकण्ठीरवः ॥ १

(शा.वि.)

यद्वर्गाष्टकपूरितं वरदलं सानाहतं नीरजं,
यच्चौँकारकलापबिन्दुकलितं मध्ये त्रिरेखाञ्चितम् ।

यत्सर्वार्थकरं परं गुणवतां, कालत्रये वर्तिनां,
तत् क्लेशौघविनाशनं भवतु नः श्रीसिद्धचक्रेश्वरम् ॥(शा.वि.)२

शब्दब्रह्मैकलीनं प्रबलबलयुतं सर्वतत्त्वप्रभावं,
सानन्दं सर्वभद्रं गणधरवलयं दुःखपाशप्रणाशम् ।
यन्नैमित्तं वरिष्ठं विपदि हृदि धृतं सज्जनानां च नित्यं,
तद् दत्तं यस्य बाहौ रिपुकुलमथनं सिद्धचक्रं नमामि ॥ ३
(स्रग्धरा)

यच्छुद्धं व्योमबीजं ह्यध उपरि युतं रा(या)न्तसिद्धाक्षरेण,
यत्सन्धौ तत्त्वयुक्तं स्वरपरमपदैर्वेष्टितं मध्यबीजम् ।
यत् सीमन्तं निरन्तं विगतकलिमलं मायया वेष्टिताङ्गं,
जीयात् तत् सिद्धचक्रं विमलवरगुणं देव-नागेन्द्रवन्द्यम् ॥ ४
(स्रग्धरा)

यद् वश्यादिककारकं बहुविधं कामार्थिनां कामदम्,
यल्लक्षाधिकजापसिद्धविमलं सत्सम्पदां दायकम् ।
यत् कुष्ठादिकदुष्टदोषदलनं दुःखाभिभूतात्मनाम्
यत् तत्त्वैकफलप्रदं विजयतां, श्रीसिद्धचक्रं भुवि ॥(शा.वि.)५

ऊर्ध्वाधोरेफयुक्तं गगनमुपहतं बिन्दुनाऽनाहतेन,
ह्रीँकारेण प्रकृष्टं स्वरसुगुरुपदैर्वेष्टितं बाह्यदेशे ।
पद्मं वर्गाष्टकाङ्कं दलमुखविवरेऽनाहताढ्यं तदित्थं,
ह्रीँकारेण त्रिवेष्टं कलशवलयितं सिद्धिदं सिद्धचक्रम् ॥ ६
(स्रग्धरा)

व्योमोर्ध्वाधोरयुक्तं शिरसि च विलसन् नादबिन्द्वर्धचन्द्रम्,
स्वाहान्तौँ कारपूर्वैर्गुरुभिरभिवृतं सस्वरं चाष्टवर्गम् ।

अन्तस्थानाहत श्रीगणधरवलयालङ्कृतं ध्यानसाध्यं
वन्दे श्रीसिद्धचक्रं सुरगणमहितं मायया त्रिःपरीतम् ॥ ७

(स्रग्धरा)

यत् सर्वाङ्गिहितं मनुष्यमहितं सौख्यालयं धर्मिणाम्,
यद् दोषैः परिवर्जितं सुगदितं ध्यानाधिरूढाङ्कितम् ।
यत् कर्मक्षयकारकं सुधवलं मन्त्राधिपाधिष्ठितम्,
तन्नः पातु वरं भवाब्धिशमनं श्रीसिद्धचक्रं सदा ॥(शा.वि.)८

## ३५. ॥ श्रीसिद्धचक्रचैत्यवन्दनम् ॥

(अनुष्टुप्)

दिव्यचक्षुर्विशुद्धात्मा, कारुण्योदधिचन्द्रमाः ।
शक्राणामपि यो नाथस्तं वन्देऽहं जिनेश्वरम् ॥ १

कर्मकश्मलनिर्मुक्तः सिद्धानन्तचतुष्टयः ।
सिद्धिदेवीमनोरामी, तं सिद्धं प्रणमाम्यहम् ॥ २

आचारपालने शूरः शुद्धमार्गोपदेशकः ।
अज्ञानध्वान्तमार्तण्डस्तमाचार्यं सदा स्तुवे ॥ ३

आगमाभ्यासतल्लीनो, योग्यपाठनतत्परः ।
भवारण्ये शरण्यो य-स्तं भजामि प्रपाठकम् ॥ ४

यो भवाम्भोधिसन्तर्ता, परेषामपि तारकः ।
त्रिजगज्जीवसंत्राता, साधुसिंहं नमामि तम् ॥ ५

सम्यग्दर्शनदीपोऽयं, नूतनस्तैलवर्जितः ।
तत्त्वार्थे रुचिरूपो यस्तं धरामि मनोगृहे ॥ ६

जीवाजीवादितत्त्वानां, ज्ञानभानुः प्रकाशकः ।
तमस्संमोहसंहर्ता, स जीयान्मे हिताय वै ॥ ७

चक्रिणाऽपि सदा सेव्यं, कर्मव्याधिविनाशकम् ।
परानन्दैकबीजं यत्, तच्चारित्रं स्पृहाम्यहम् ॥ ८

कर्मवृक्षहिमं मान्यं, सूर्यमानप्रकारकम् ।
तीर्थपेनापि यत्सेव्यं, तत्तपस्त्वं तपस्व रे ॥ ९

जिनेन्द्रै मुँनिपैः प्रोक्त-म्पूज्यं नवपदात्मके ।
सिद्धचक्रं भजेन्नित्यं, श्रीपालवत्स शं लभेत् ॥ १०

## ३६. ॥ श्रीसिद्धचक्रचैत्यवन्दनम् ॥

(वसन्ततिलका)

कर्माष्टकारिबलनाशनतीक्ष्णचक्र-
म्भूतादिजन्यविपुलासुखशात्रवघ्नम् ।
सत्पुण्यवारिधिविकासनचारुचन्द्रं,
श्रीसिद्धचक्रमतिभावयुता नमामः ॥ १

संसारसागरनिमग्नसुपोततुल्यं,
नागेन्द्रनारिनमिताङ्गसुकान्तिसेव्यम् ।
देवेन्द्रचन्द्रनरनायकपूज्यपूज्यं,
श्रीसिद्धचक्रमतिभावयुता नमामः ॥ २

वन्द्यार्हदादिकपदात्मकतत्त्वयन्त्र,-
म्भक्ताय देवतरुवत्कमनीयशन्दम् ।

श्रीपालभूपतिभृशामलचित्तगम्यं,
श्रीसिद्धचक्रमतिभावयुता नमामः ॥ ३

## ३७. ॥ श्रीसिद्धचक्रचैत्यवन्दनम् ॥

(शार्दूलविक्रीडित)

आराध्यं जिनपुङ्गवं गतमदं शक्रादिसंपूजितं,
सज्ज्ञानादिगुणैकरत्ननिलयं निर्दोषसन्मानसम्
ज्ञानाऽसिक्षतकर्मजालममलं मुक्तिप्रियाऽऽलिङ्गितं,
सम्पूर्णार्थमहं नमामि शिवदं सिद्धं च बुद्धं सदा ॥ १

गच्छाऽधीशमनेकसद्‌गुणमयं सौम्यं गणानां पतिं,
वन्देऽहं वरवाचकं श्रुतधरं क्षान्त्यादिधर्मप्रियम् ।
मित्राऽमित्रसमानदृष्टिमखिलां चारित्रिणां मालिकां,
निर्वाणाऽऽस्पदसाधनोद्यतमतिं भूमण्डले चाऽन्वहम् ॥ २

श्रीसर्वज्ञगणप्रदिष्टमनघं ज्ञानं पवित्रं परं,
तत्त्वाऽर्थप्रतिपादने च कुशलं सद्दर्शनं सौख्यदम् ।
विच्छिन्नाऽऽस्रवकर्मगुप्तिसमितिक्षेमं च चारित्रकं,
दुष्कर्मेन्धनदाहदक्षमतुलं प्रीत्याऽऽश्रये सत्तपः ॥ ३

पापौघप्रलये हुताशनसमं माङ्गल्यमालाप्रदं,
त्रैलोक्ये परमोपकारकरणे तत्त्वं परं सद्‌गुरुम् ।
भावाऽऽपत्तिविदारकं गुणवतां शुद्धेः परं कारणं,
वन्दे मोक्षसुखस्य कारणमिमं जन्मादिदुःखाऽपहम् ॥ ४

भव्याऽब्जप्रतिबोधने दिनमणिं संसारसिन्धुप्लवं,
चिन्तारत्नसुरद्रुमादधिगुणं सद्भावसंवर्द्धकम् ।
आराध्यं नवकाररूपमनघं तत्त्वत्रयोद्दीपकं,
वन्देऽहं नितरां सुखैकसदनं श्रीसिद्धचक्रं मुदा ॥ ५

## ३८. ॥ श्रीसिद्धचक्रयन्त्रोद्धारपूजनविधिः ॥

(अनुष्टुप्)

ॐ ह्रीँ अर्हँ नमः स्मृत्वा, मूलमन्त्रमथार्हतः ।
वक्ष्ये श्रीसिद्धचक्रस्य, यन्त्रोद्धारं यथाविधि ॥ १

पद्ममष्टदलाकारं, कल्पयेत् तत्र कर्णिकाम् ।
ॐ ह्रीँ अनाहतैर्वृत्तम्, अर्हँ बीजं स्वरैर्वृतम् ॥ २

सिद्धाः पूर्वदले स्थाप्या, दक्षिणे सूरयस्तथा ।
पाठकाः स्युः प्रतीचीने, साधवस्तूत्तरे दले ॥ ३

आग्नेये दर्शनं सम्यग्,-ज्ञानञ्च नैर्ऋते दले ।
वायव्ये शुद्धचारित्र-मैशाने पल्लवे तपः ॥ ४

नवपदमिदं पद्म-मद्वितीयं जगत्त्रये ।
परीतोऽस्य दलानि स्युः, षोडशान्तरिते दले ॥ ५

अष्टौ स्वरादयो वर्गा, मन्त्रः सप्ताक्षरस्तथा ।
वर्गाः सानाहता ज्ञेया, मन्त्रमूलं यतोऽक्षरम् ॥ ६

अष्टावनाहता स्थाप्या-स्तृतीये वलये क्रमात् ।
मध्येऽनाहतमष्टाढ्या-श्चत्वारिंशच्च लब्धयः ॥ ७

ह्रीँकारेण त्रिरेखेण, वेष्टयेत् परीतः समम् ।
क्रौँकारान्तमिदं ज्ञेयं, वेष्टनं सर्वरक्षणम् ॥ ८

परिधावस्य संस्थाप्या, अष्टौ गुर्वादिपादुकाः ।
आराध्योऽयं क्रमः पूर्णो, वक्ष्येऽथो यन्त्ररक्षकान् ॥ ९

स्थाप्या दिक्षु जयामुख्या, जम्भामुख्या विदिक्षु च ।
विमलवाहनाद्याः स्यु-र्देवताश्चक्ररक्षकाः ॥ १०

ततश्च वलये विद्या-देव्यः षोडश निर्मलाः ।
दक्षिणेऽतो विभागे स्यु-श्चतुर्विंशतियक्षपाः ॥ ११

चतुर्विंशतियक्षिण्यो, वामपार्श्वे स्थिता वरम् ।
वीराश्च द्वारपालाश्च, चतुर्दिक्षु शिवङ्कराः ॥ १२

इन्द्राद्या दशदिक्पाला, दशस्वपि दिशासु ते ।
राजन्ते यन्त्रमूले च, सूर्यादयो नव ग्रहाः ॥ १३

नवापि निधयः कण्ठे, नैसर्पिकादयः स्थिताः ।]
सन्तु प्रत्यूहनाशाय, दिक्पालाः सपरिच्छदाः ॥ १४

इत्थं श्रीसिद्धचक्रं ये, सबीजे क्षोणिमण्डले ।
आराधयन्ति तेषां स्यु-र्वशे सर्वार्थसिद्धयः ॥ १५

एतदेव परं तत्त्वमेतदेव परं पदम् ।
एतदाराध्यमेतच्च, रहस्यं जिनशासने ॥ १६

सुगन्धैः कुसुमैः शालि-तन्दुलैर्वाऽस्य साधकाः ।
शुचिशीला ध्रुवं सिद्धिं, लभन्ते लक्षजापतः ॥ १७

सिद्धे चास्मिन् महामन्त्रे, देवो विमलवाहनः ।
अधिष्ठाताऽस्य चक्रस्य, पूरयत्येव वाञ्छितम् ॥ १८

शान्तिके पौष्टिके शुक्लं, वश्ये चाकर्षणेऽरुणम् ।
पीतं स्तम्भेऽसितं द्वेष्ये, ध्येयमेतच्च साधकैः ॥ १९

अर्हमात्मानमोँअग्नि-शुद्धं मायाऽमृतप्लुतम् ।
सुधाकुम्भस्थमाकण्ठं, ध्यायेच्छान्तिककर्मणि ॥ २०

आह्वानं स्थापनं चैव, सन्निधानं च रोधनम् ।
अर्चनं च विधायात्र, ततः कार्यं विसर्जनम् ॥ २१

लेखनं पूजनं चैव, कुम्भकेनैव कारयेत् ।
आह्वानं पूरकेणैव, रेचकेन विसर्जनम् ॥ २२

एक-द्वि-त्रि-चतुः -पञ्च-शतैरष्टोत्तरैः क्रमात् ।
स्याच्छिवास्याक्षिभूसङ्ख्य-वर्णजापो महाफलः ॥ २३

दिक्कालासनमुद्रादि-विधिपीयूषसेकतः ।
श्रीसिद्धचक्रकल्पद्रु-र्वाञ्छितं फलति ध्रुवम् ॥ २४

॥ इति श्रीसिद्धचक्रयन्त्रोद्धारे विधिचतुर्विंशतिका समाप्ता ॥

## ३९. ॥ श्रीसिद्धचक्रतपोविधानोद्यापन-चतुर्विंशतिका ॥

(अनुष्टुप्)

श्रीमते सिद्धचक्राद्य-बीजाय परमार्हते ।
नत्वा तत्पूर्वसेवाया-स्तपोविधिरथोच्यते ॥ १

आश्विनस्य सिताष्टम्यां, निर्दोषायां यथाविधि ।
कृत्वा श्रीसिद्धचक्रार्चा-माद्याचाम्लो विधीयते ॥ २

ततश्चाष्टाह्निकोत्सवं, कृत्वाऽऽशु नवमे दिने ।
कृते पञ्चामृतस्नात्रे, ह्याचाम्लो नवमो भवेत् ॥ ३

एवं चैत्रे नवाचाम्ला, भवन्त्येव निरन्तराः ।
ततोऽर्धपञ्चवर्षेषु, सम्पूर्णं पूर्यते तपः ॥ ४

एकाशीतिर्भवत्येव-माचाम्लानामिहाथवा ।
अशक्तैरेकभक्ताना-मेकाशीतिर्विधीयते ॥ ५

इत्थं श्रीसिद्धचक्रस्य, तपः कृत्वा ह्युपासकैः ।
कार्यमुद्यापनं तस्य, यथाशक्त्या विवेकिभिः ॥ ६

मण्डलं सिद्धचक्रस्य चैत्यादौ शुद्धभूतले ।
सन्मन्त्रपूतैः पञ्चाभ-धान्यैरालिख्यते स्फुटम् ॥ ७

तत्रार्हमिति बीजोर्ध्व-स्थापितप्रतिमाऽग्रतः ।
स्थाप्यं सन्नालिकेरस्य, सखण्डाज्योरुगोलकम् ॥ ८

सिद्धाद्यष्टदलश्रेणि-रपि पूज्या च गोलकैः ।
शर्करालिङ्गकैरर्च्या, षोडशानाहतावली ॥ ९

द्राक्षाश्चैकोनपञ्चाश-दष्टवर्गाक्षरोपरि ।
बीजपूराष्टकं सप्ता-क्षरमन्त्रेषु मण्डयेत् ॥ १०

खारिकाख्यफलान्यष्ट-चत्वारिंशत्सु लब्धिषु ।
जयादिषु च जंभीरी-फलान्यष्टौ तु योजयेत् ॥ ११

गुर्वादिपादुकास्वष्टौ, दाडिमीनां फलानि च ।
चक्राधिष्ठायके चैकं, न्यसेत् कुष्माण्डमुत्तमम् ॥ १२

यक्षादिषु चतुःषष्टि-पदेषु क्रमुकावलिम् ।
नवाक्षोटफलानीह, निधिस्थानेषु कल्पयेत् ॥ १३

ग्रहेभ्यो ग्रहवर्णानि, फलानीहोपढौकयेत् ।
चतुर्भ्यो द्वारपालेभ्यो, बलिकूटाँश्च पीतभान् ॥ १४

वीरेभ्यस्तिलवर्तेश्च, देयं कूटचतुष्टयम् ।
दिक्पालेभ्यश्च तद्वर्ण-बलिपिण्डफलादिकम् ॥ १५

ह्रीँकारकलशाकारा, रेखा भूमण्डलस्य च ।
धान्येनैव विशुद्धेन, तत्तद्वर्णेन साधयेत् ॥ १६

ततः श्रीसिद्धचक्रस्य, पटस्थप्रतिमादिषु ।
कृत्वा पञ्चामृतस्नात्रं, पूजां चैव सविस्तराम् ॥ १७

सबृहद्वृत्तपाठं च, विहिते मण्डलार्चने ।
गुरौ तपोविधातॄणां, कुर्वाणे चोपबृंहणाम् ॥ १८

मुख्येन्द्रोऽपि समादाय, पीठान्नवसराः स्रजः ।
तपःकर्तृपुरो भूत्वा, प्राह प्राञ्जलिरीदृशम् ॥ १९

धन्याश्च कृतपुण्याश्च, यूयं यैर्विहितं तपः ।
एतत्तपःप्रभावाच्च, भूयाद् वो वाञ्छितं फलम् ॥ २०

एवमुच्चैःस्वरं जल्प-न्ननल्पाकल्पधारिणाम् ।
तपोविधातृबन्धूनां, करे यच्छति मालिकाः ॥ २१

ते चार्हन्तं नमस्कृत्य, सानन्दं स्वकरैः स्रजः ।
स्वस्वसम्बन्धिनां कण्ठे, क्षिपन्ति समहोत्सवम् ॥ २२

ततश्चेन्द्रेण पीठाग्रे, कृते मङ्गलदीपके ।
शक्रस्तवादिकं कृत्वा, श्रोतव्या गुरुदेशना ॥ २३

गीतनृत्यादिकं कृत्वा, दत्वा दानं स्वशक्तितः ।
सोत्सवं च गृहे गत्वा, कार्यं सङ्घार्चनादिकम् ॥ २४

॥ इति श्रीसिद्धचक्रतपोविधानोद्यापनचतुर्विंशतिका ॥२॥

## ४०. ॥ श्रीसिद्धचक्राराधनफलचतुर्विंशतिका ॥

(अनुष्टुप्)

एवं श्रीसिद्धचक्रस्या-राधको विधिसाधकः ।
सिद्धाख्योऽसौ महामन्त्र-यन्त्रः प्राप्नोति वाञ्छितम् ॥ १

धनार्थी धनमाप्नोति, पदार्थी लभते पदम् ।
भार्यार्थी लभते भार्यां, पुत्रार्थी लभते सुतान् ॥ २

सौभाग्यार्थी च सौभाग्यं, गौरवार्थी च गौरवम् ।
राज्यार्थी च महाराज्यं, लभतेऽस्यैव तुष्टितः ॥ ३

एतत्तपोविधातारः, पुमांसः स्युर्महर्द्धयः ।
सुर-खेचर-राजानो, रूपसौभाग्यशालिनः ॥ ४

अस्य प्रभावतो घोरं, विषं च विषमज्वरम् ।
दुष्टं कुष्टं क्षयं क्षिप्रं, प्रशाम्यति न संशयः ॥ ५

तावद् विपन्नदी घोरा, दुस्तरा यावदङ्गिभिः ।
नाप्यते सिद्धचक्रस्य, प्रसादविशदा तरी ॥ ६

बद्धा रुद्धा नरास्तावत्, तिष्ठन्ति क्लेशवर्तिनः ।
यावत् स्मरन्ति नो सिद्ध-चक्रस्य विहितादराः ॥ ७

एतत्तपोविधायिन्यो योषितोऽपि विशेषतः ।
वन्ध्या-निन्द्रादिदोषाणां, प्रयच्छन्ति जलाञ्जलिम् ॥ ८

वैकल्यं बालवैधव्यं, दुर्भगत्वं कुरूपताम् ।
दुर्भगात्वं च दासीत्वं, लभन्ते न कदाचन ॥ ९

यद्यदेवाभिवाञ्छन्ति, जन्तवो भक्तिशालिनः ।
तत्तदेवाप्नुवन्ति श्री-सिद्धचक्रार्चनोद्यताः ॥ १०

एतदाराधनात् सम्य-गाराद्धं जिनशासनम् ।
यतः शासनसर्वस्व-मेतदेव निगद्यते ॥ ११

एभ्यो नवपदेभ्योऽन्य - न्नास्ति तत्त्वं जिनागमे ।
ततो नवपदी ज्ञेया, सदा ध्येया च धीधनैः ॥ १२

ये सिद्धा ये च सेत्स्यन्ति, ये च सिध्यन्ति साम्प्रतम् ।
ते सर्वेऽपि समाराध्य, पदान्येतान्यहर्निशम् ॥ १३

त्रिधा शुद्ध्या समाराध्य, मे (चै)षामेकतरं पदम् ।
भूयांसोऽपि भवन्ति स्म, पदं राज्यादिसम्पदाम् ॥ १४

अस्याद्यपदमाराध्य, प्राप्ताः स्वामित्वमुत्तमम् ।
नरेषु देवपालाद्याः, कार्तिकाद्याः सुरेषु च ॥ १५

द्वितीयपदमाराध्य, ध्यायन्तः पञ्चपाण्डवाः ।
सिद्धाचले समं कुन्त्या, संप्राप्ताः परमं पदम् ॥ १६

नास्तिकः कृतपापोऽपि, यत् प्रदेशी सुरोऽभवत् ।
तदस्यैव तृतीयस्य, पदस्योपकृतं महत् ॥ १७

चतुर्थपदमस्यैवा-राधयन्तो यथाविधि ।
धन्याः सूत्रमधीयन्ते, शिष्याः सिंहगिरेरिव ॥ १८

विराध्याराध्य चैतस्य, पञ्चमं पदमेव हि ।
दुःखं सुखं च संप्राप्ता, रुक्मिणी चाथ रोहिणी ॥ १९

षष्ठं पदं च यैरस्य, निर्मलं कलितं सदा ।
कृष्ण-श्रेणिकमुख्यास्ते, श्लाघनीयाः सतामपि ॥ २०

सप्तमं पदमेतस्य, समाराध्य समाधितः ।
महाबुद्धिधना जाता, धन्या शीलमती सती ॥ २१

पदमस्याष्टमं सम्यग्, यदाराद्धं पुरादरात् ।
तत् श्रीजम्बूकुमारेण, सुखेनाप्तं शिवं पदम् ॥ २२

अस्यैव नवमं शुद्धं, पदमाराध्य सम्मदात् ।
वीरमत्या महासत्या, प्राप्तं सर्वोत्तमं फलम् ॥ २३

किं बहूक्तेन भो भव्या, अस्यैवाराधकैर्नरैः ।
तीर्थकृन्नामकर्माऽपि, हेलया समुपार्ज्यते ॥ २४

॥ इति श्रीसिद्धचक्राराधनफलचतुर्विंशतिका ॥३॥

## ४१. ॥ श्रीनवपदचैत्यवन्दनम् ॥

(वसन्ततिलका)

जैनेन्द्रमिन्द्रमहितं गतसर्वदोषं,
ज्ञानाद्यनन्तगुणरत्नविशालकोशम् ।
कर्मक्षयं शिवमयं परिनिष्ठितार्थं,
सिद्धं च बुद्धमविरुद्धमहं च वन्दे ॥ १

गच्छाधिपं गुणगणं गणिनं सुसौम्यं,
वन्दामि वाचकवरं श्रुतदानदक्षम् ।
क्षान्त्यादिधर्मकलितं मुनिमालिकां च,
निर्वाणसाधनपरं नरलोकमध्ये ॥ २

सद्दर्शनं शिवमयं च जिनोक्तसत्यं,
तत्त्वप्रकाशकुशलं सुखदं सुबोधम् ।
छिन्नाश्रवं समितिगुप्तिमयं चरित्रं,
कर्माष्टकाष्ठदहनं सुतपः श्रयामि ॥ ३

पापौघनाशनकरं वरमंगलं च,
त्रैलोक्यसारमुपकारपरं गुरुं च ।
भावातिशुद्धिवरकारणमुत्तमानां,
श्रीमोक्षसौख्यकरणं हरणं भवानाम् ॥ ४

भव्याब्जबोधनरविं भवसिन्धुनावं,
चिन्तामणेः सुरतरोरधिकं सुभावम् ।
तत्त्वत्रिपादनवकं नवकाररूपं,
श्रीसिद्धचक्रसुखदं प्रणमामि नित्यम् ॥ ५

## ४२. ॥ श्रीनवपदचैत्यवन्दनम् ॥

सकलाभिष्टदमुत्तमं नवपदं, सल्लब्धिदं राजताम् ।
सुमनोवृक्ष इवास्य तीर्थपतयः सिद्धमुनीस्तथा ॥ १

हितकृद् वाचकसाधवश्च सुतपो, रत्नत्रयं सुन्दरम् ।
नवशाखा च फलं प्रतीतमहिमाऽऽनन्दाब्धि निःश्रेयसम् ॥ २

जगतीसारमयं महागुणमयं, संविन्मयं भावयम् ।
सुमनोध्येयमयं दयारसमयं, सिद्धान्तविद्यामयम् ॥ ३

भविनां कर्महरं मनोहरनिधिं, श्रीपालपीडाहरम् ।
मनसा भक्तियुतः स्तवीमि सततं, श्री सिद्धचक्रवरम् ॥ ४

असुमत्कर्महरं सुदर्शनमिदं, चक्रवरं भासते ।
गुणसंस्थानजुषां यदर्चनबलान्नित्यं गुणो वर्धते ॥ ५

अमृतस्थानपिपासुभव्यजनता, निर्वाणसत्कस्यन्दनम् ।
जगतीव्यापकमेतदेव भजतां, श्रीसिद्धचक्रपरम् ॥ ६

## ४३. ॥ श्रीनवपदचैत्यवन्दनम् ॥

(वसन्ततिलका)

राकेशकाशघनसार पिनाकिधाम,
शोभाकलापविलसत्कमनीयकान्तिम् ।
शान्तं गुणैरविसमैर्जनराजिराजं,
वन्देऽरिहन्तजिनदेवमहं विमोहम् ॥ १

ज्ञानप्रकाशविमलीकृतविश्वविश्वं,
सूर्यप्रभाभरणभूषितकाम्यकायम् ।
क्षोण्यामरन्तमनघं जनतोपकृत्यै,
सद्देशनं जिनवरं मनसाऽभिवन्दे ॥ २

जघन्यतैकसुरकोटिरमोघवाचः
पादद्वयं जिनपतेः श्रयते सदाऽर्च्यम् ।
सौन्दर्यसारजितकामं जणबोध,
बोधाय हृदहृदये जिनपं भजेऽहम् ॥ ३

धर्मप्रदानेन सुखीकृतभव्यजीव,
दोषव्रजैर्भवकरैः सततं विधुरं ।
आधारभूतमिहजन्तुगणस्य सौम्यं,

भक्त्या जिनेन्द्रमहिमात्महिताय सेवे ॥ ४

प्रातः स्वाराध्यकमनीयप्रशान्तमूर्ति,
श्रीमद्गुरोर्विमलमुक्तिसुनामभाजः ।
स्वान्ते निधाय चरणद्वयपद्म भृंगे,
रंकः करोति जिनवंदनमात्ममोहि ॥ ५

## ४४. ॥ श्रीनवपदचैत्यवन्दनम् ॥

(इन्द्रवज्रा)

सिद्धयन्ति कार्याणि यतोऽत्रपुंसां,
सद्ध्यानजापाल्लघुचिन्तितानि ।
वन्देऽभिसेवे पदमव्ययं तत्, स्ताच्छ्रेयसे भूरितमाय सिद्धम् ॥१

स्वात्मस्वरुपे रममाणमाप्तं, वाणी परं दोषवितानहीनः ।
सिद्धपदं तद्भवभावभुक्तं,
भो जीव ! भो मित्र ! सदानुचिन्त ॥ २

क्षीणः समस्तो भवमोहराशि, ज्ञानादिसंचितं न सिद्धिभाजाम् ।
येषां च तान् सिद्धतमान् प्रशस्तान्,
चेतोऽभिशुद्ध्या सततं नमामि ॥ ३

दीक्षाऽभिकाले परमान्नमन्ति, पूज्यारिहन्ता अपि यांश्च सिद्धान्।
अनन्तचातुष्टयराजमानान्, तान् भावये ध्येयतमान् हृदन्ते ॥४

सिद्धाश्च ते मे गुरुराजमुक्ते-र्यच्छन्तु मुक्तेः पदमव्ययं ततः ।
पंन्यासरंगः कृपया प्रभुणां भूयात्तथैवात्र मनोऽभिलाषः ॥ ५

पू.आ.श्रीपूज्यपादविरचिता

# ४५. ॥ श्रीसिद्धभक्तिः ॥

(स्रग्धरा)

सिद्धानुद्धूतकर्म्मप्रकृतिसमुदयान् साधितात्मस्वभावान्
वन्दे सिद्धप्रसिद्ध्यै तदनुपमगुणप्रग्रहाकृष्टितुष्टः ।
सिद्धिः स्वात्मोपलब्धिः प्रगुणगुणगणो(णा)च्छादिदोषापहारा-
द्योग्योपादानयुक्त्या दृषद इह यथा हेमभावोपलब्धिः ॥ १

नाभावः सिद्धिरिष्टा न निजगुणहतिस्तत्तपोभिर्न युक्ते-
रस्त्यात्मानादिबद्धः सुकृतजफलभुक् तत्क्षयान्मोक्षभागी ।
ज्ञाता दृष्टा स्वदेहप्रमितिरुपसमाहारविस्तारधर्म्मा
ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः ॥२

स त्वन्तर्बाह्यहेतुप्रभवविमलसद्दर्शनज्ञानचर्य्या
संपद्धेति प्रघातक्षतदुरिततया व्यञ्जिताचिन्त्यसौरः (सूरः) ।
कैवल्यज्ञानदृष्टिप्रवरसुखमहावीर्यसम्यक्त्वलब्धि-
ज्योतिर्वातायनादिस्थिरपरमगुणैरद्भुतैर्भासमानः ॥ ३

जानन् पश्यन् समस्तं सममनुपरतं संप्रतृप्यन्वितन्वन्
धून्वन् ध्वान्तं नितान्तं निचितमनुसभं प्रीणयन्नीशभावम् ।
कुर्व्वन् सर्वप्रजानामपरमभिभवं ज्योतिरात्मानमात्मा
आत्मन्येवात्मनासौ क्षणमुपजनयन् स स्वयम्भूः प्रवृतः ॥ ४

छिंदन् शेषानशेषान्निगलबलकलींस्तैरनन्तस्वभावैः
सूक्ष्मत्वाग्र्यावगाहागुरुलघुकगुणैः क्षायिकैः शोभमानः ।

अन्यैश्चान्यव्यपोहप्रवणविषयसम्प्राप्तिलब्धस्वभावै
रूर्ध्वं व्रज्या स्वभावात् समयमुपगतो धाम्नि सन्तिष्ठतेऽग्र्ये ॥५

अन्याकाराप्तिहेतुर्न च भवति परो येन तेनाल्पहीनः
प्रागात्मोपात्तदेहप्रतिकृतिरुचिराकार एव ह्यमूर्त्तः ।
क्षुत्तृष्णाश्वासकासज्वरमरणजरानिष्टयोगप्रमोह-
व्यापत्याद्युग्रदुःखप्रभवभवहतेः कोऽस्य सौख्यस्य माता ॥ ६

आत्मोपादानसिद्धं स्वयमतिशयवद्वितबाधं विशालं
वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावम् ।
अन्यद्रव्यानपेक्षं निरुपममितं शाश्वतं सर्वकालं
उत्कृष्टानन्तसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥ ७

नार्थः क्षुत्तृड्विनाशाद् विविधरसयुतैरन्नपानैरशुच्याः
न स्पृष्टेर्गन्धमाल्यै र्नहि मृदुशयनैर्ग्लानिनिद्राद्यभावात् ।
आतङ्कार्त्तेरभावे तदुपशमनसद्भेषजानर्थतावद्
दीपानर्थक्यवद्वा व्यपगततिमिरे दृश्यमाने समस्ते ॥ ८

तादृक् सम्पत्समेता विविधनयतपःसंयमज्ञानदृष्टि-
चर्य्याः सिद्धाः समन्तात् प्रविततयशसो विश्वदेवाधिदेवाः ।
भूता भव्या भवन्तः सकलजगति ये स्तूयमाना विशिष्टैः
तान् सर्वान् नौम्यनन्तान् निजिगमिषुरहं तत्स्वरुपं त्रिसन्ध्यम्॥९

## ४६. ॥ श्रीआचार्यभक्तिः ॥

सिद्धगुणस्तुति-निरतानुद्धूत-रुषाग्निजालबहुलविशेषान् ।
गुप्तिभिरभिसम्पूर्णान्
मु(यु)क्तियुतसत्यवचनलक्षितभावान् ॥ १

मुनिमाहात्म्यविशेषान्, जिनशासनसत्प्रदीपभासुरमूर्तीन् ।
सिद्धिं प्रपित्सुमनसो, बद्धरजो विपुलमूलघातनकुशलान् ॥ २

गुणमणिविरचितवपुषः षड्द्रव्यनिश्चितस्य धातॄन् सततम् ।
रहितप्रमादचर्यान् दर्शनशुद्धान् गणस्य सन्तुष्टिकरान् ॥ ३

मोहच्छिदुग्रतपसः प्रशस्तपरिशुद्धहृदयसुव्यवहारान् ।
प्रासुक्यनिलयाननघानाशाविध्वंसिचेतसो हतकुपथान् ॥ ४

धारितविलसन्मुण्डान्, वर्जितबहुदण्डपिण्डमण्डलनिकरान् ।
सकलपरिषहजयिनः क्रियाभिरनिशं प्रमादतः परिरहितान् ॥५

अचलान् व्यपेतनिद्रान् स्थानयुतान् कष्टदुष्टलेश्याहीनान् ।
विधिनानाश्रितवासानलिप्तदेहान् विनिर्जितेन्द्रियकरिणः ॥ ६

अतुलानुत्कुटिकासान्, विविक्तचित्तानखण्डितस्वाध्यायान् ।
दक्षिणभावसमग्रान् व्यपगतमदरागलोभशठमात्सर्यान् ॥ ७

भिन्नार्तरौद्रपक्षान् सम्भावितधर्म्मसुनिर्म्मलहृदयान् ।
नित्यं पिनद्धकुगतीन् पुण्यान्
गण्योदयान् विलीनगारवचर्यान् ॥ ८

तरुमूलयोगयुक्तानवकाशातापयोगरागसनाथान् ।
बहुजनहितकरचर्यानभयानघान् महानुभावविधानान् ॥ ९

ईदृशगुणसम्पन्नान् युष्मान् भक्त्या विशालया स्थिरयोगान् ।
विधिनानारतमग्र्यान् मुकुलीकृत-
हस्तकमलशोभितशिरसा ॥ १०

अभिनौमि सकलकलुषप्रभवोदयजन्मजरामरणबन्धनमुक्तान् ।
शिवमचलमनघमक्षयव्याहतमुक्तिसौख्यमस्त्विति सततम् ॥११

## ४७. ॥ पञ्चपरमेष्ठिस्तुतिः ॥

(आर्या)

श्रीमदमरेन्द्र-मुकुटप्रघटितमणिकिरणवारिधाराभिः ।
प्रक्षालितपदयुगलान् प्रणमामि जिनेश्वरान् भक्त्या ॥ १

अष्टगुणैः समपेतान् प्रणष्टदुष्टाष्टकर्मरिपुसमितीन् ।
सिद्धान्सततमनन्तान्नमस्करोमीष्टतुष्टिसंसिद्ध्यै ॥ २

साचारश्रुतजलधीन्प्रतीर्य शुद्धोरुचरणनिरतानाम् ।
आचार्याणाम् पदयुगकमलानि दधे शिरसि मेऽहम् ॥ ३

मिथ्यावादिमदोग्रध्वान्त-प्रध्वंसिवचनसन्दर्भान् ।
उपदेशकान्प्रपद्ये मम दुरितारिप्रणाशाय ॥ ४

सम्यग्दर्शनदीपप्रकाशका मेयबोधसम्भूताः ।
भूरिचरित्रपताकास्ते साधुगणास्तु मां पान्तु ॥ ५

जिनसिद्धसूरिदेशक-साधुवरानमलगुणगणोपेतान् ।
पञ्चनमस्कारपदैस्त्रिसन्ध्यमभिनौमि मोक्षलाभाय ॥ ६

एष पञ्चनमस्कारः सर्वपापप्रणाशनः ।
मङ्गलानां च सर्वेषां प्रथमं मङ्गलं भवेत् ॥ (अनुष्टुप्) ७

श्रीमदर्हत्सिद्धाचार्योपाध्यायाःसर्वसाधवः ।
कुर्वन्तु मङ्गलं सर्वे निर्वाणपरमश्रियम् ॥ (अनुष्टुप्) ८

सर्वान् जिनेन्द्रचन्द्रान् सिद्धानाचार्यपाठकान् साधून् ।
रत्नत्रयं च वन्दे रत्नत्रयं सिद्धये भक्त्या ॥ ९

पान्तु श्रीपादपद्मानि पञ्चानां परमेष्ठिनाम् ।
लालितानि सुराधिश-चूडामणिमरीचिभिः ॥ (अनुष्टुप्) १०

प्रातिहार्यैर्जिनान् सिद्धान् गुणैः सूरीन् स्वमातृभिः ।
पाठकान् विनयैः साधून् योगाङ्गैरष्टभिः स्तुवे ॥(अनुष्टुप्) ११

## ४८. ॥ श्रीगुरुस्तोत्रम् ॥

(अनुष्टुप्)

यथा प्राणा नराधारास्तथैव सुखसागरः ।
नित्यं नमामि नाथ ! त्वां त्वमेव शरणं मम ॥ १

चखान दुष्टकर्माणि दिव्यज्ञानदिवाकरः ।
चारित्ररत्नभण्डारदर्शनं विमलं कृतम् ॥ २

दानशीलतपोभाव अष्टमातृपरायणः ।
आबालब्रह्मचारी च भाविता भावना सदा ॥ ३

कषाय-मदनिद्रादि पञ्चेन्द्रियाण्यशेषतः ।
जितानि हास्यजिन्नूनं वैरिणी विकथाजिता ॥ ४

निर्जितौ काममोहौ च रागद्वेषविवर्जितः ।
धौतं सकलमिथ्यात्वं सम्यक्त्वरागरञ्जितः ॥ ५

नयनिक्षेपसंवेत्ता गुणस्थानं विशेषतः ।
विजानासि गुणग्राहिन् ! स्याद्वादञ्च महारसम् ॥ ६

पवित्रनामजापेन ज्ञानादिसकलं फलं ।
लभन्ते सर्वधीमन्तो नैवात्र कोपि संशयः ॥ ७

त्वमेव प्राणकाधारस्त्वमेव हितकारकः ।
त्वमेव सुखसौन्दर्यस्त्वमेव भवतारकः ॥ ८

त्रैलोक्यसिन्धोर्भवतापहर्तुर्गुरोः प्रसादप्रभुताङ्कितान्तः ।
तस्यैव सानन्दसुखाम्बुराशेः पादौ सदानन्दरसेन नौमि ॥ ९

पू.मु.श्री रविसागरगणिविरचितम्

## ४९. ॥ श्रीगुरुवर्णनम् ॥

(स्रग्धरा)

श्रीमद् यत्पादजाताः प्रबलबलभृतः शोणिमानन्दधीना
ऊर्ध्वं तिर्यक्त्व स्तोघे दिति किल विचरन्त्यंशवः क्ष्माकृपार्द्राः।
स्थानं यत्रास्य भानोस्तत इममभियोधः करिष्यामहे हि
श्रीमद्भिः स्वैर्महोभिर्भुवनमविभुवत्तापयत्येष शश्वत् ॥ १

पोतायन्ते यदीयक्रमणभवविभाः प्रौढमाहात्म्यभाजो
नीरन्ध्रयाः के नु जातैर्विवरपरिचिताः सुश्रियश्चद्धिधायै ।
यद्येवं नो कथं तत् सकलतनुमतस्तारयन्त्यञ्जसैताः
संसारापारनीरेश्वरगुरुनिरयाऽशर्म्म पङ्कौघमग्नान् ॥ २

स्वाहाभुक् कौशिकाद्याः प्रणमनसमये भूरि भक्त्यानुषक्ता-
श्चित्ते चित्रं दधाना मुखदशकमधुभ्रान्तिमन्मत्ययुक्ता ।

भूयिष्ठश्रीनिधानामिव सुखजननात् प्राणभाजां च येषां
प्रोद्यद्दीप्रप्रभाढ्यक्रमनखमुकुरक्रोडसङ्क्रान्तबिम्बम् ॥ ३

बिभ्राणैर्यत्क्रमाब्जैः प्रसृमरकिरणान् जघ्निरे लीलयैवाऽ-
ज्ञानस्थाष्णूनि यानि भ्रमररुचिशितीन्यन्धकाराणि नूनम् ।
तान्युग्रांशोर्न शिष्णून्यपि निबिडरुचिं सन्दधाना नृणां नो
मार्त्तण्डश्चण्डभावं दधदहनि हिनस्त्यस्तदोषोऽपि पादैः ॥ ४

विघ्नाघोद्यत्तमोध्ने सुघनघनघटाघर्म-सङ्घातघातं
निर्मोघत्वार्घ यार्घ्यं ... ... ... .... ... ... ... ... ।
सद्घोषैःश्लाघ्यमानं घनघृणि घटयत्यङ्घ्रियुग्मं यदीयं
निर्विघ्नान् विघ्ननिघ्नानतिघनघृणया श्लाघ्यघोषानघोषान् ॥५

भूयः सत्याश्रितोऽपि प्रमथपतिधिया नास्ति सत्याश्रितश्च
ध्वस्तप्रोद्यत्करोऽपि प्रचुरकरगणान् सन्दधानः समन्तात् ।
कर्ताषूच्चैर्वृषोक्तेर्व्यपगतवृषवाग्पादपद्मो यदीयो
रक्तस्त्यक्तस्मरोऽपि प्रतिभयभयकृन्निर्भयत्वप्रदोऽपि ॥ ६

शुद्धाबुद्धिर्गुणौघः श्रयति हि नितरामेतदेवानुकम्पा
प्रोद्यद्नं... तस्मादहमपि विलसद्वाञ्छितस्थानहेतुः ।
भावादेतद् भजामि प्रमुखशमरसो नूनमिद्धं यदीयं
स्वान्तारण्यं शरण्याश्रयणमिति यदध्यास्तविध्वस्तशङ्कः ॥ ७

सिद्धिं यावद्विशुद्धां परमतमरमा प्राप्तिहेतोर्जनौघो
व्याचष्टे पूजनीयान् विकसितकुसुमैः प्रार्थनामन्तरेण ।
येषां पादान् सपादान्नखरुचिविलसन् मञ्जरीन् कल्पवृक्षान्
जङ्घोद्यत्स्कन्धबुध्नोद्गतलसदरुणाभाङ्गुली पल्लवाढ्यान् ॥८

क्षेमोद्यद्वृक्षकक्षेक्षणकरजलदानक्षिलक्षैः समीक्ष्यान्
साक्षाद्रक्षोविपक्षक्षपणबलवता क्ष्मातिरक्षाक्षमाशान् ।
प्रेक्षस्थोन्मोक्षकाङ्क्षोर्यदमलचलनान् भिक्षुलक्षा नमन्ति
क्षोणीं क्षान्त्या क्षिपन्तः क्षणिकरतिकरस्त्रीकटाक्षाक्षिताक्षाः ॥९

प्राज्यैश्वर्ये निषण्णस्त्रिदशनमसिताश्वक्रलक्ष्मीं दधाना
प्रक्षिप्तारिष्टकष्टाः शुचिरुचिकमलास्वामिनो नन्दकाभाः ।
विभ्राजन्ते यदीयाः परमतमपदाश्वक्रिणो वा क्षमायां
तन्वाना वैनतेयश्रियमहितवृषोत्कर्षमोषि प्रतापाः ॥ १०

पादद्वन्द्वाऽङ्गुलीसत् किशलयकलितौ बभ्रतुर्मानवाना-
मन्यूनश्रीफलाप्तिर्विबुधजनमतच्छायया सेव्यमानौ ।
हस्तान्निर्गच्छदच्छच्छविनिचयवनैर्नित्यसंसिच्यमानौ
यत्पादौ पादपौ वा शुचिरुचिनिचिताम्भोजपुञ्जालवालौ ॥ ११

प्रोद्यद्विद्याद्यविद्याधरनिकरमुदः सद्य उद्योतविद्या
नन्द्यावर्तैरनिन्द्यद्युपतिहतविभा उद्यमासाद्यमद्य ।
द्युत्युद्यानं प्रसुद्यक्रमणजलधरश्छिन्वते द्राग् यदीया
द्यां द्युत्योद्योत्यमुद्यद्द्युसदधिपमताविद्युदुद्योतजैत्राः ॥ १२

प्राज्ञैर्येषां शशाङ्के क्रमणरुचिरिति भ्राज्यशोकद्रुमस्य
च्छायाविस्तारिता किं गुरुभिरितिपरैर्माव्यथा तापजाऽभूत् ।
शुद्धान्तर्भावभाजामखिलतनुमतां सिद्धिसिद्धाध्वनी द्वे
निर्वाणापूर्वदेशप्रगमकृतधियां शुद्धबुद्ध्यध्वगानाम् ॥ १३

मित्रत्वेनापि युक्तं चरणयुगमदोन्यस्वभावं यदीयं
केनाप्यप्रास्तशस्तद्युतिजननयनैर्दृश्यमानस्वरूपम् ।

बिभ्रन्नो चण्डभावं त्विषि च कुवलयं प्रापयत्युग्रतोषं
शोभामम्भोरुहाणामपहरति करोत्युद्धवं कौशिकस्य ॥ १४

तानन्तानन्दपङ्क्तेः सदसि विदधता वादरेणादरेण
कालं कालं क्षिपन्तौ प्रतिभयभयदं मानवानां नवानाम् ।
कामं कामं जयन्तौ जगति घटजवद्वासमुद्रं समुद्रं
दूरे दूरेपसोवो वसतिमसुभृतां साधयन्तौ धयन्तौ ॥ १५

माञ्जिष्ठीभूतभावो ध्रुवमिति रुषया प्रेषयामास रागो
यत्पादोद्भूतभानिर्गमनकपटतो मार्गणौघान् प्रगाढम् ।
प्रोद्यत्प्रद्योतनाद्यस्खलितगुरुरुचीन् निर्भिःतिष्ठत्ययं किं
कृत्वाऽधः पादयोर्मां निरतिशयशमश्रीसमालिङ्गिताङ्गः ॥ १६

प्रोच्चैः प्राचीनबर्हिनिचयरुचिचितिश्चित्तचार्वेकचेष्ट-
श्चण्डार्च्चिवन्न चर्च्यः शुचीवचनविपश्चिच्चयैर्निश्चयोर्च्यः ।
प्रोचे वाचा प्रपञ्चैः शुचिशुचिरचनो यत्क्रमार्चि गुणो नो
चार्चाचारोक्ति चञ्चुप्रवचनचतुराचार्यचक्रस्य चञ्चत् ॥ १७

इत्यन्तः क्रोधरुद्धादधुरपरिमितं द्वादशापि प्रतापे
रक्तोष्णत्वं पतङ्गाद् ध्रुवमभिभवितुं यत्क्रमार्च्चिर्विभूषाम् ।
तज्जैष्यावोस्य केतून्वयमपि परीतश्वेदभीशून् सतां नः
पद्भ्यां भूभृद्गुरुभ्यां भ्रमति भृशमभीर्भ्रंशयन् हेलयायं ॥ १८

स्फूर्जत्मुक्ताफलाभाच्छिशिररुचिसमुल्लासभर्तुर्यदीयात्
पादद्वन्द्वात्पयोधेरिव लहरिरिव द्युद्बहिर्निर्जगाम ।
भूयः शैत्यानुषक्ता बहुलवसुमतीं व्यश्नुवाना स्फुरन्ती
प्रख्यातादच्युतश्रीवरवसतितया शेषकान्त्योपगूढा ॥ १९

मन्ये धात्रेति येषां शुभजननपटूभ्राजिनौ निर्मितौ स्तः
पादावालम्बनार्हौ गुणमित जगतस्तारणार्थं समर्थौ ।
प्रोच्चैः पोतायमानौ लसदसुखकृति प्रौढसंसारसिन्धौ
मा पप्तत्तप्त्यभावात्कलिकलिलभरात्क्रान्तमत्यन्तमेतत् ॥ २०

भूयः कल्पप्रभास्वत्फलदपदतया चारु चामीकराद्रि-
श्वञ्चच्वेन्द्रानुकारं कुवलयवरमुन्निर्मितित्वेन नित्यम् ।
येषां सत्पादपद्मः क्षितिपतिरतिकृद्रक्षयोर्व्या प्कृपित्वा (?)
दुर्गे स्वर्गापवर्गाध्वनि सदरितया स्पन्दनं सस्पदागः ॥ २१

कामं कामाङ्कुशोत्थैररुणिममिलितैः प्रग्रहैः सन्दधानै-
र्भूषाभावं जनानां सदसि किशलगं चोर्ध्वदेशेवदातैः ।
वर्णैः पुण्याग्रमाल्यस्थितमिति विलसद् विभ्रमस्य प्रदानात्
यत् पादैः पारिजातक्षितिरुहमहिमाहानिमानीयते हि ॥ २२

पादद्वन्द्वं यदीयं कजमिव शुशुभे भूरि सौरभ्यपृक्तं
सन्मुद्धूर्या रोहणार्हं शुचिविकचतया चारुरुक् चीयप्रोच्चैः ।
..............................................................
सर्वोर्वीभृत्प्रबर्ह प्रणतिपरशिरः श्रेणिचूडामणिद्युत् ॥ २३

प्रेम्णा प्रेम्णा प्रणामप्रवणतमहृदः प्राप्नुवन्ति प्रमोदं
प्रौढं दीप्रप्रकारं प्रसृमरभविकाः प्राणिनः प्रेक्षयाढ्याः ।
येषां प्राज्ञप्रभौघात् प्रियतरचरणान् क्ष्माप्रणम्यान् प्रणम्य
प्राज्य प्रौढप्रमादप्रतिभटनिधनप्राप्तदीप्रप्रतापान् ॥ २४

येषां पादारविन्दं सबलमपि भियं प्रापयत्पुष्पकेतु-
र्भीरुं वा भूम्यधीशं कृतरुचिकमलालिङ्गनत्वेन नित्यम् ।

विश्वक् सेनायमानं प्रमथपतिकुलं शङ्करत्वात् क्षमाया
उज्जृम्भाम्भोजगर्भाश्रितमिति परमेष्ठीयते निष्ठितार्थम् ॥ २५

भक्त्यैवं संस्तुतास्ते जिनशतकमहाकाव्यनाम्नः किलाद्यैः
पादैः कारुण्यपुण्यास्त्रिजगतिगुरवश्चारुनिःश्रेयसाप्त्यै ।
कुर्वन्तु श्रीफलाप्तिं प्रणिपतनकृतां नालिकेरद्रुवद्द्राग्
नित्यं सत्यं गुणौघं वपुषि निदधता भ्राजमाने कलाभिः ॥ २६

## ५०. ॥ श्रीश्रमणगुणस्तुतिः ॥

(विषमवृत्तम्)

जातिजरोरुरोगमरणातुरशोकसहस्रदीपिताः
दुःसहनरकपतनसन्त्रस्यधियः प्रतिबुद्धचेतसः ।
जीवितमम्बुबिन्दुचपलं तडिदभ्रसमा विभूतयः
सकलमिदं विचिन्त्य मुनयः प्रशमाय वनान्तमाश्रिताः ॥ १

व्रतसमितिगुप्तिसंयुताः शिवसुखमाधाय मनसि वीतमोहाः ।
ध्यानाध्ययनवशङ्गताः विशुद्धये कर्मणां तपश्चरन्ति ॥ २

दिनकरकिरणनिकरसन्तप्तशिलानिचयेषु निस्पृहाः
मलपटलावलिप्ततनवः शिथिलीकृतकर्मबन्धनाः ।
व्यपगतमदनदर्परतिदोषकषायविरक्तमत्सराः
गिरिशिखरेषु चण्डकिरणाभिमुखस्थितयो दिगम्बराः ॥ ३

सज्ज्ञानामृतपायिभिः क्षान्तिपयः सिच्यमानपुण्यकायैः ।
धृतसन्तोषच्छत्रकैस्तापस्तीव्रोऽपि सह्यते मुनीन्द्रैः ॥ ४

शिखिगलकज्जलालिमलिनैर्विबुधाधिपचापचित्रितैः
भीमरवैर्विसृष्टचण्डाशनिशीतलवायुवृष्टिभिः ।
गगनतलं विलोक्यं जलदैः स्थगितं सहसा तपोधनाः
पुनरपि तरुतलेषु विषमासु निशासु विशङ्कमासते ॥ ५

जलधाराशरताडिता न चलन्ति चरित्रतः सदा नृसिंहाः ।
संसारःदुःखभीरवः परीषहारातिघातिनः प्रवीराः ॥ ६

अविरतबहलतुहिनकणवारिभिः अङ्घ्रिपपत्रपातनैः
अनवरतमुक्तसीत्काररवैः परुषैरथानिलैः शोषितगात्रयष्टयः ।
इह श्रमणा धृतिकम्बलावृताः शिशिरनिशां
तुषारविषमां गमयन्ति चतुःपथे स्थिताः ॥ ७

इति योगत्रयधारिणः सकलतपःशालिनः प्रवृद्धपुण्यकायाः ।
परमानन्दसुखैषिणः समाधिमग्र्यं दिशन्तु नो भदन्ताः ॥ ८

## ५१. ॥ श्रीचारित्रगुणस्तुतिः ॥

(शार्दूलविक्रीडित)

येनेन्द्रान्भुवनत्रयस्य विलसत्केयूरहाराङ्गदान्
भास्वन्मौलिमणिप्रभाप्रविसरोत्तुङ्गोत्तमाङ्गान्नतान् ।
स्वेषां पादपयोरुहेषु मुनयश्चक्रुः प्रकामं सदा
वन्दे पञ्चतयं तमद्य निगदन्नाचारमभ्यर्चितम् ॥ १

अर्थव्यञ्जनतद्द्वयाविकलता कालोपधाप्रश्रयाः
स्वाचार्याद्यनपण्हवो बहुमतिश्चेत्यष्टधा व्याहृतम् ।

श्रीमज्ज्ञातिकुलेन्दुना भगवता तीर्थस्य कर्त्राऽजसा
ज्ञानाचारमहं त्रिधा प्रणिपताम्युद्धूतये कर्मणाम् ॥ २

शङ्कादृष्टिविमोहकाङ्क्षणविधिव्यावृत्तिसन्नद्धतां
वात्सल्यं विचिकित्सनादुपरतिं धर्मोपबृंहक्रियाम् ।
शक्त्या शासनदीपनं हितपथाद् भ्रष्टस्य संस्थापनम्
वन्दे दर्शनगोचरं सुचरितं मूर्ध्ना नमन्नादरात् ॥ ३

एकान्ते शयनोपवेशनकृतिः सन्तापनं तानवम्
सङ्ख्यावृत्तिनिबन्धनामनशनं विष्वाणमर्द्धोदरम् ।
त्यागं चेन्द्रियदन्तिनो मदयतः स्वादो रसस्यानिशम्
षोढा बाह्यमहं स्तुवे शिवगतिप्राप्त्यभ्युपायं तपः ॥ ४

स्वाध्यायः शुभकर्मणश्च्युतवतः सम्प्रत्यवस्थापनं
ध्यानं व्यापृतिरामयाविनि गुरौ वृद्धे च बाले यतौ ।
कायोत्सर्जनसत्क्रिया विनय इत्येवं तपः षड्विधं
वन्देऽभ्यन्तरमन्तरङ्गबलवद्विद्वेषिविध्वंसनम् ॥ ५

सम्यग्ज्ञानविलोचनस्य दधतः श्रद्धानमर्हन्मते
वीर्यस्याविनिगूहनेन तपसि स्वस्य प्रयत्नाद्यतेः ।
या वृत्तिस्तरणीव नौरविवरा लघ्वी भवोदन्वतो
वीर्याचारमहं तमूर्जितगुणं वन्दे सतामर्चितम् ॥ ६

तिस्रः सत्तमगुप्तयस्तनुमनोभाषानिमित्तोदयाः
पञ्चेर्यादिसमाश्रयाः समितयः पञ्चव्रतानीत्यपि ।
चारित्रोपहितं त्रयोदशतयं पूर्वं न दृष्टं परै-
राचारं परमेष्ठिनो जिनपतेर्वीरं नमामो वयम् ॥ ७

आचारं सह पञ्चभेदमुदितं तीर्थं परं मङ्गलं
निर्ग्रन्थानपि सच्चरित्रमहतो वन्दे समग्रान्यतीन् ।
आत्माधीनसुखोदयामनुपमां लक्ष्मीमविध्वंसिनी-
मिच्छन् केवलदर्शनावगमनप्राज्यप्रकाशोज्ज्वलाम् ॥ ८

अज्ञानाद्यदवीवृतं नियमिनोऽवर्तिष्यहं चान्यथा
तस्मिन्नर्जितमस्यति प्रतिनवं चैनोनिराकुर्वति ।
वृत्ते सप्ततयीं निधिं सुतपसामृद्धिं नयत्यद्भुतं
तन्मिथ्या गुरुदुष्कृतं भवतु मे स्वं निन्दतो निन्दितम् ॥ ९

पू.आ.श्री विबुधप्रभसूरिविरचितम्

## ५२. ॥ श्रीविवाहप्रज्ञप्तिपञ्चमाङ्गस्तोत्रम् ॥

(शिखरिणी)

चतुर्विंशश्रीमज्जिन विततवंश ध्वजलते !
सुधर्मस्याभ्युद्यद्-वदनविधुचन्द्रातपतते ! ।
नव-स्फुर्जत्-तत्त्वप्रकटनकलादीपकलिके !
विवाहप्रज्ञप्ते ! जय जय जय त्वं भगवति ! ॥ १

जितात्मा षण्मासावधिसमयसंसाधनपरः,
सहायैः सम्पन्नो गतविकृतिकाचाम्लतपसा ।
उपास्ते भक्त्या श्रीभगवति गतक्लान्तिरनिशं;
महामन्त्रं यस्त्वां स भवति महासिद्धि भवनम् ॥ २

शिव श्रीवश्यत्वं विकटविपदुच्चाटनघटां,
समाकृष्टिं सिद्धेर्विषयमनसो द्वेषणविधिम् ।

विमोहं मोहस्य प्रभवदशुभस्तम्भविभवं;
ददत्या मन्त्रत्वं किमिव भगवत्या न भवति ? ॥ ३

महार्घं रत्नाढ्यं प्रसृमरसुवर्णं निधिमिव,
क्षमा-संवीतं त्वां सुभग ! भगवत्यङ्ग ! कृतिनः ! ।
तपस्यन्तो ज्ञानाञ्जननिचितसद्दर्शनतया;
लभन्ते ये ते स्युर्नहि जगति दौर्गत्यभवनम् ॥ ४

गभीरः सद्रत्नो दिशि विदिशि विस्मेरमहिमा,
क्षमाभृद्भिः सेव्यो जयति भगवत्यङ्गजलधिः ।
कवीन्द्राः पर्जन्या इव यमुपजीव्य प्रकरणा-
ऽमृतैर्वृष्टिं चक्रुः कटरि बहुधान्योपकृतये ॥ ५

अलीकार्तिच्छेदो विशदतरता दर्शनविधौ,
विभेदोऽन्तर्ग्रन्थेर्घनहृदयशुद्धिर्विमलता ।
सतापोद्यत्-कामज्वरभरहृतिः सद्‌गतिकृतिः
त्रिदोषी-मोषोऽपि व्यरचि भगवत्यङ्गभिषजा ॥ ६

सदौषध्याटोपं न घटयसि नो लङ्घनविधिं,
क्वचिज्जन्तोः प्रख्यापयसि न कषायान् वितरसे ।
तथाऽप्याधत्से त्वं विषमतमकर्मामयहृतिं;
नवीनस्त्वं वैद्यो जयसि भगवत्यङ्ग ! जगति ॥ ७

तदेवं विश्वेषामपहरसि निष्कारणकृतो-
पकार-स्फारान्तर्गतनत विकारव्रजमपि ।
विवाहप्रज्ञप्ते ! तदपि मयि बाह्यज्वरभर-
व्यथाक्रान्ते सम्प्रत्यहह करुणां किं न कुरुषे ? ॥ ८

वदत्येवं यावद् रजनिविरमे विंशदिवसे,
विनेयस्तापार्त्तेरयमुदयप्रभसूरिगुरोः ।
स आत्मानं तावत् प्रमुद सुभगः श्रीभगवती;
प्रभावाददाक्षीत् पटुतरमपेतज्वरतया (यु.) ॥ ९

विवाहप्रज्ञप्ते ! स्तवनमवनौ योऽत्र विबुध-
प्रभाचार्यप्रोक्तं पठति शठता-भाव-रहितः ।
स वीतप्रत्यूहं भजति परपारं प्रवचना-
ऽधिदेव्याः सान्निध्यादनणुगणियोगाख्यतपसः ॥ १०

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ५३. ॥ श्रीसिद्धान्तस्तवनम् ॥

नत्वा गुरुभ्यः श्रुतदेवतायै सुधर्मणे च श्रुतभक्तिनुन्नः ।
निरुद्धनानावृजिनागमानां जिनागमानां स्तवनं तनोमि ॥ १
(उपजाति)

सामायिकादिक-षडध्ययन-स्वरूप-
मावश्यकं शिवरमावदनात्मदर्शम् ।
निर्युक्ति-भाष्य-वर-चूर्णि-विचित्रवृत्ति-
स्पष्टीकृतार्थनिवहं हृदये वहामि ॥ (वसन्ततिलका) २

युक्तिमुक्तास्वातिनीरं प्रमेयोर्मिमहोदधिम् ।
विशेषावश्यकं स्तौमि महाभाष्यापराह्वयम् ॥ (अनुष्टुप्) ३

दशवैकालिकं मेरुमिव रोचिष्णुचूलिकम् ।
प्रीतिक्षेत्रं सुमनसां सत्कल्याणमयं स्तुमः ॥ (अनुष्टुप्) ४

उद्घामुपोद्घातविकल्पकालभेदप्रभेदप्रतिभेदरूपाम् ।
मिताभिधानाममिताभिधेयां
स्तौम्योघनिर्युक्तिममोघयुक्तिम् ॥ (उपजाति) ५

पिण्डविधिप्रतिपत्तावखण्डपाण्डित्यदानदुर्ललिताम् ।
ललितपदश्रुतिमिष्टामभिष्टुमः पिण्डनिर्युक्तिम् ॥(आर्या) ६

प्रवचननाटकनान्दी प्रपञ्चितज्ञानपञ्चकसतत्त्वा ।
अस्माकममन्दतमं कन्दलयतु नन्दिरानन्दम् ॥ (आर्या) ७

अनुयोगद्वाराणि द्वाराणीवापुनर्भवपुरस्य ।
जीयासुः श्रुतसौधाधिरोहसोपानरूपाणि ॥ (आर्या) ८

अनवमनवमरससुधाह्रदिनीं षट्त्रिंशदुत्तराध्ययनीम् ।
अञ्चामि पञ्चचत्वारिंशतमृषिभाषितानि तथा ॥ (आर्या) ९

उच्चैस्तरोदञ्चितपञ्चचूडमाचारमाचारविचारचारु ।
महापरिज्ञास्थनभोगविद्यमाद्यं प्रपद्येऽङ्गमनङ्गजैत्रम् ॥ १०
(उपजाति)

त्रिषष्टिसंयुक्तशतत्रयीमितप्रवादिदर्पाद्रिविभेदह्लादिनीम् ।
द्वयश्रुतस्कन्धमयं शिवश्रिये कृतस्पृहः सूत्रकृताङ्गमाद्रिये ॥११
(वंशस्थ)

स्थानाङ्गाय दशस्थानस्थापिताखिलवस्तुने ।
नमामि कामितफलप्रदानसुरशाखिने ॥ (अनुष्टुप्) १२

तत्तत्सङ्ख्याविशिष्टार्थप्ररूपणपरायणम् ।
संस्तुमः समवायाङ्गं समवायैः स्तुतं सताम् ॥ (अनुष्टुप्) १३

या षट्त्रिंशत्सहस्रान् प्रतिविधिसजुषां बिभ्रती प्रश्नवाचां
चत्वारिंशच्छतेषु प्रथयति परितः श्रेणिमुद्देशकानाम् ।
रङ्गद्भङ्गोत्तरङ्गा नयगमगहना दुर्विगाहा विवाह-
प्रज्ञप्तिः पञ्चमाङ्गं जयती भगवती सा विचित्रार्थकोशः ॥ १४
(स्रग्धरा)

कथानकानां यत्रार्द्धचतस्रः कोटयः स्थिताः ।
सोत्क्षिप्तादिज्ञातहृद्या ज्ञातधर्मकथाः श्रिये ॥ (अनुष्टुप्) १५

आनन्दादिश्रमणोपासकदशकेतिवृत्तसुभगार्थाः ।
विशदामुपासकदशा भावदृशं मम दिशन्तु सदा ॥(आर्या) १६

महदृषिमहासतीनां गौतमपद्मावतीपुरोगाणाम् ।
अधिकृतशिवान्तसुकृताः स्मरतौच्चैरन्तकृद्दशाः कृतिनः ॥१७
(आर्या)

गुणैर्यदध्ययनकलापकीर्तिता
अनुत्तराः प्रशमिषु जालिमुख्यकाः ।
अनुत्तरश्रियमभजन्ननुत्तरो-
पपातिकोपपददशाः श्रयामि ताः ॥ (वंशस्थ) १८

अङ्गुष्ठाद्यवतरदिष्टदेवतानां
विद्यानां भवनमुदात्तवैभवानाम् ।
निर्णीतास्रवविधिसंवरस्वरूपाः
प्रश्नव्याकरणदशा दिशन्तु शं नः ॥ (प्रहर्षिणी) १९

ज्ञातैर्मृगापुत्रसुबाहुवादिभिः
शासद्विपाकं सुखदुःखकर्मणाम् ।

द्विःपङ्क्तिसङ्ख्याध्ययनोपशोभितं
श्रीमद्विपाकश्रुतमस्तु नः श्रिये ॥ (इन्द्रवंशा) २०

प्रणिधाय यत्प्रवृत्ता शास्त्रान्तरवर्णनातिदेशततिः ।
नमतौपपातिकं तत्प्रकटयदुपपातवैचित्रीम् ॥ (आर्या) २१

सूर्याभवैभव-विभावनहृष्टतीर्थ-
प्रश्नादनन्तरमिनाननिर्गतेन ।
केशिप्रदेशिचरितेन विराजि राज-
प्रश्नीयमिद्धमुपपत्तिशतैर्महामि ॥ (वसन्ततिलका) २२

जीवाजीवनिरूपि द्वेधा प्रतिपत्तिनवककमनीयम् ।
जीवाभिगमाध्ययनं ध्यायेमासुगमगमगहनम् ॥ (आर्या) २३

षट्त्रिंशता पदैर्जीवाजीवभावविभावनीम् ।
प्रज्ञापनां पनायामि श्यामार्यस्याऽमलं यशः ॥ (आर्या) २४

विवृताद्यद्वीपस्थिति-जिनजनिमहचक्रिदिग्विजयविधये ।
भगवति जम्बूदीपप्रज्ञप्ते ! तुभ्यमस्तु नमः ॥ (आर्या) २५

प्रणमामि चन्द्रसूर्यप्रज्ञप्ती यमलजातिके नव्ये ।
गुम्फवपुषैव नवरं नातिभिदाऽर्थात्मनापि ययोः ॥(आर्या) २६

कालादिकुमाराणां महाहवारम्भसम्भृतैर्दुरितैः ।
दर्शितनरकातिथ्या निरयावलिका विजेषीरन् ॥ (आर्या) २७

पद्मादयः कल्पवतंसभूयमुपेयिवांसः सुकृतैः शमीशाः ।
यत्रोदिताः श्रेणिकराजवंश्या
उपास्महे कल्पवतंसिकास्ताः ॥ (उपजाति) २८

चन्द्रसूर्यबहुपुत्रिकादिभि, र्यत्र संयमविराधना फलम् ।
भुज्यमानमगृणाद् गणाधिपः(पैः) पुष्पिताः
शमभिपुष्पयन्तु ताः ॥ (रथोद्धता) २९

श्रीह्रीप्रभृतिदेवीनां चरित्रं यत्र सूत्रितम् ।
ताः सन्तु मे प्रसादानुकूलिकाः पुष्पचूलिकाः ॥(अनुष्टुप्) ३०

वृष्णीनां निषधादीनां द्वादशानां यशःस्रजः ।
पुष्णन्तु भक्तिनिष्णानां दशां वृष्णिदशाः शुभाम् ॥ ३१
(अनुष्टुप्)

वन्दे मरणसमाधिं प्रत्याख्याने महातुरोपपदे ।
संस्तारचन्द्रवेध्यकभक्तपरिज्ञाचतुःशरणम् ॥ (आर्या) ३२

वीरस्तवदेवेन्द्रस्तवगच्छाचारमपि च गणिविद्याम् ।
द्वीपाब्धिप्रज्ञप्तिं तन्दुलवैचारिकं च नुमः ॥ ३३

शिवाध्वदीपायोद्धातानुद्धातारोपणात्मने ।
चित्रोत्सर्गापवादाय निशीथाय नमो नमः ॥ (अनुष्टुप्) ३४

निर्युक्तिभाष्यप्रमुखैर्निबन्धैः सहस्रशाखीकृतवाच्यजातम् ।
दशाश्रुतस्कन्धमनात्तगन्धं परैः सकल्पव्यवहारमीडे ॥ ३५
(उपजाति)

षट्सप्तपङ्क्तिविंशतिषट्गुणसप्तप्रकारकल्पानाम् ।
विस्तारयिता कल्पितफलदः स्तात् पञ्चकल्पो नः ॥ ३६
(आर्या)

लेभे यद्व्यवहारेणाधुनान्त्येनापि मुख्यता ।
तं जीतकल्पमाकल्पकल्पं तीर्थश्रियः श्रये ॥ (अनुष्टुप्) ३७

अञ्चामि पञ्चघ्ननवप्रमाणमाचाम्लसाध्यं कुमतैरबाध्यम् ।
महानिशीथं महिमौषधीनां
निशीथिनीशं शिवविथिभूतम् ॥ (उपजाति) ३८

निर्युक्तिभाष्यवार्तिकसङ्ग्रहणीचूर्णिटिप्पनकटीकाः ।
सर्वेषामप्येषां चेतसि निवसन्तु नः सततम् ॥ (आर्या) ३९

परिकर्म (१) सूत्र (२) पूर्वानुयोग (३)
पूर्वगत (४) चूलिका (५) भेदम् ।
ध्यायामि दृष्टिवादं कालिकमुत्कालिकं श्रुतं चान्यत् ॥ ४०
(आर्या)

यस्या भवन्त्यवितथा अद्याप्येकोनषोडशादेशाः ।
सा भगवती प्रसीदतु ममाङ्गविद्याऽनवद्यविधिसाध्या ॥ ४१
(आर्या)

वन्दे विशेषणवतीं सम्मतिनयचक्रवाल-तत्त्वार्थान् ।
ज्योतिष्करण्ड-सिद्धप्राभृत-वसुदेवहिण्डीश्च ॥ (आर्या) ४२

कर्मप्रकृतिप्रमुखाण्यपराण्यपि पूर्वसूरिरचितानि ।
समयसुधाम्बुधिपृषतान् परिचिनुमः प्रकरणानि चिरम् ॥ ४३
(आर्या)

व्याकरणछन्दोऽलङ्कृति-नाटक-काव्य-तर्क-गणितानि ।
सम्यग्दृष्टिपरिग्रहपूतं जयति श्रुतज्ञानम् ॥ (आर्या) ४४

सर्वश्रुताभ्यन्तरङ्गा कृतैनस्तिरस्कृतिं पञ्चनमस्कृतिं च ।
तीर्थप्रवृत्तेः प्रथमं निमित्तमाचार्यमन्त्रं च नमस्करोमि ॥ ४५
(उपजाति)

इति भगवतः सिद्धान्तस्य प्रसिद्धफलप्रथां
गुणगणकथां कण्ठे कुर्याज्जिनप्रभवस्य यः ।
वितरतितरां तस्मै तोषाद्वरं श्रुतदेवता
स्पृहयति च सा मुक्तिश्रीस्तत्समागमनोत्सवम् ॥(हरिणी) ४६

पू.आ.श्रीसोमतिलकसूरिविरचितम्

## ५४. ॥ श्रीज्ञानपञ्चमीस्तवनम् ॥

(आर्या)

श्रीशैवेयं यादवविशालकुलकुवलयैकहिमरश्मिम् ।
गौसम्भारविभासितवस्तुस्तोमं नमस्कृत्य ॥ १

विश्वप्रकाशकारणतरणिज्ञानस्तवेन संयुक्तम् ।
भक्तिभरभावितात्मा वक्ष्येऽहं पञ्चमीस्तवनम् ॥ २

क्रमतो मतिश्रुतावधिसुमनःपर्यायकेवलाख्यानि ।
ज्ञानानि पञ्च केवलिकथितानि सुदुर्लभानि नृणाम् ॥ ३

यस्मादेतेषु पुनस्त्रिकालमुपकारकरणकौशल्यात् ।
तद्वेदिभिर्गुरुतरं श्रुतं स्मृतं भव्यसत्वानाम् ॥ ४

तस्मादनवरतमिदं श्रयणीयं शुद्धबुद्धिभिः सम्यक् ।
अविशिष्टज्ञानानामवाप्तिहेतोर्विशिष्टानाम् ॥ ५

उत्पत्त्यादित्रिपदीरूपं त्रिजगद्धितं त्रिजगदीशैः ।
गदितं तृतीयनेत्रोपमं श्रुतं प्रकटितत्रिजगत् ॥ ६

प्रकृतिपरोपकृतिभरैः प्राकृतमयमिदमकारि गणभृद्भिः ।
नहि जलधिर्विपुलतरस्तरीतुमलमन्तरेण तरीम् ॥ ७

सर्पत्सदर्पकन्दर्पसर्पगरलोर्मिभिर्भ्रमिं याद्भिः ।
अमरत्वमभिलषद्भिर्यदमृतमिव पीयते भविकैः ॥ ८

किञ्च यदोमित्यक्षरमिवाक्षरं लिप्सवः पदं विशदम् ।
करणत्रितयविशुद्ध्या विधिवद् ध्यायन्ति शुद्धधियः ॥ ९

सुहृदयहृदयाकाशप्रचारिणा खरसमीरणेनेव ।
येनाहन्यन्त घनान्यघानि घनमण्डलानीव ॥ १०

स्वस्वचरित्राकर्णनरसिकाश्चलितासनाश्चलाभरणाः ।
यस्मै विस्मितहृदयाः स्पृहयन्ति सुराः कृताञ्जलयः ॥ ११

यस्मात् समुल्लसाऽतुलफलमिव कल्पपादपादवनौ ।
धर्मः कर्मक्षयकृन्निरुपमशर्मप्रदानपटुः ॥ १२

यस्य पुरो नमतां परभावाः स्फूर्तिं भजन्ति भूवलये ।
अभिशरभं राभसिका मदोत्कटाः करटिनो ननु के ? ॥ १३

शिवमौलिरनुत्तरमुखकमलग्रीवेयकानयग्रीवः ।
सुरदशनोदरहृदयः पर्यन्तार्णवविशालकटिः ॥ १४

सुरगिरिनाभिश्च नभो वलयाञ्चितभुजपदादिकावयवः ।
यत्र त्रिभुवनपुरुषः सङ्क्रामत्यात्मदर्श इव ॥ १५

भवतस्तदवतु भवतो भजन्तु भव्याश्च तदभवन्तोऽपि ।
कृत्यानि तेन कुर्वन्त्यनिशं तस्मै नमस्यन्तु ॥ १६

जानीत ततः स्वहिताहितं विहायाहितानि कृत्यानि ।
तस्य स्मरताजस्रं तस्मिन् यूयं यतध्वं च ॥ १७

यन्मनसीदं ज्ञानं मिथ्यात्वं नैव तं पराभवति ।
किं रविविमानमभितः प्रसरन्ति तमांस्यपि कदाचित् ? ॥१८

श्रयत श्रुतप्रवहणं यद् यत् संस्मृत्य संसृतिसमुद्रम् ।
अतिलङ्घ्य लेभिरे प्राक् परमपदं द्वीपवदनेके ॥ १९

यस्येदं हृदि वसति प्रकटितविकटप्रभावसम्भारम् ।
मन्त्र इव तस्य न पुरः स्फुरन्ति विपदः कदाचिदपि ॥ २०

जगति तदस्ति न किञ्चिन्न साध्यते.....स्त्रिकालविदः ।
वचनैर्विरोधरहितैरासिद्धेर्वीतरागस्य ॥ २१

तस्मादाराधयताध्ययनेनाऽध्यापनेन वाचनया ।
धर्मकथया तथाऽनुस्मरणेनाऽन्वहं तपसा ॥ २२

कर्मापनयत पुस्तकपुस्तिकाकारणैस्तदर्चाभिः ।
तद्गोपनोपकरणध्यानविधानैर्भवोपचितम् ॥ २३

एवं श्री नेमिनाथं मनसि सुमनसः संस्तुवन्तः स्मरन्तः
पञ्चम्यां पञ्चबाणाखिलविशिखमुखध्वंसवज्रोपमानम् ।
ज्ञानस्तोत्रं पवित्रं सुतपसि निरता ये पठन्ति प्रकामं
तेषां ज्ञानं न दूरे निवसति सुगतिः पञ्चमं पञ्चमी वा ॥ २४

(स्रग्धरा)

पू.आ.श्री जिनकीर्तिसूरिविरचितम्

## ५५. ॥ श्रीज्ञानपञ्चमीस्तोत्रम् ॥

नम्राखण्डलमण्डलप्रतिकलस्फूर्जद्यशोमण्डलः,
स्वर्भूर्भूतलवत्सलः कलिमलप्रक्षालनप्रत्यलः ।
दीव्यन्निर्मलकेवलः प्रविदलन्नीलोत्पलश्यामलः,
शीलस्वर्णकषोपलः स तनुतां नेमिः सतां मङ्गलम् ॥ १

(शार्दूलविक्रीडित)

श्रीज्ञानपञ्चकमवञ्चकचित्तवृत्तिः,
सम्पत्तिकारणमकारणबन्धुकल्पम् ।
अङ्गीकरोमि जडधीरपि संस्तवाय,
भेद–प्रभेदरुचिरं रुचिराङ्गसङ्गी ॥ (वसन्ततिलका) २

अहं महं प्रौढतमं तमन्वहं, निर्माय निर्माय–मनाः सनातनाः ।
आदौ मतिज्ञानभिदा उदाहरे,
मोहप्ररोहं निखिलं यथा हरे ॥ (उपजाति) ३

अवग्रहेहा–व्यवसाय–धारणाः,
षोढा भवेयुर्हृदयेन्द्रियैस्तथा ।
चतुर्विधो लोचनमानसे विना,
स्याद् व्यञ्जनाऽवग्रह इन्द्रियैः परैः ॥ (उपजाति) ४

मुदा सदाष्टा–द्विमिति स्वभेद–
मेदस्वलं निश्चिलचित्तवृत्तिः ।
प्राणौमि संसारदवे सदम्भः
समं मतिज्ञानमिदं विदम्भः ॥ (उपजाति) ५

जैनेश्वरस्य न कदाऽपि विनश्वरस्य,
सम्यक् श्रुतस्य जगतीतलविश्रुतस्य ।
एतान् कृतान्तरतमोभरखेदभेदान्,
भेदांश्चतुर्दशमुदा समुदाहरामि ॥ (वसन्ततिलका) ६

गमिकमङ्गनिबद्धमनक्षरश्रुतमनादिसपर्यवसानकम् ।
स्मरत सम्यगसञ्ज्ञिभिदा इमा–
स्तदितरा मिलिताश्च चतुर्दशा ॥ (द्रुतविलम्बित) ७

अथाऽवधिज्ञानमविज्ञशेखरः प्रव्यक्तभक्त्या मुखरीकृतः परम्।
स्तवे नुवेऽलं किल रूपिभावा-
ऽवभासनाकौशलहेलिलीलम् ॥ (उपजाति) ८

अनुगाम्यथ वर्धमानक-प्रतिपाती च तथेतरे त्रयः ।
इति षड्विधमानुमोऽवधिं,
विधिना बन्धुरलब्धिसेवधिम् ॥ (प्रबोधिता) ९

ऋजु-विपुलमतिभ्यां यद्भिदाभ्यामुभाभ्या-
मखिलमनुजलोके सञ्ज्ञिपञ्चेन्द्रियाणाम् ।
हृदयगतपदार्थग्राहकज्ञानमुख्यं,
प्रणमत मतिमन्तः श्रीमनःपर्ययाख्यम् ॥ (मालिनी) १०

समसमयसमस्तालोकलोकस्वरूप-
प्रकटनपटुशक्तिद्योतिरूद्योतिताशम् ।
सहितमिदमनन्तैर्दर्शनानन्दवीर्यैः,
सतत सहचरैः श्रीकेवलज्ञानमीडे ॥ (मालिनी) ११

ये ज्ञानपञ्चकमपास्तभवप्रपञ्च-
माराधयन्ति भविका भुवि काममुक्ताः ।
श्रीपञ्चमीदिनतपञ्चणैकतानास्-
तानाश्रयन्ति सकलाः कमलाविलासाः ॥ (वसन्ततिलका)१२

इत्थं जगत्त्रितयदीपकदीपकल्प-
श्रीज्ञानपञ्चकबृहत्तरभेदसङ्ख्याः ।
स्तुत्वा यदार्जि सुकृतं मम तेन भूयात्,
श्रीसोमसुन्दरसमुज्ज्वलबुद्धिलक्ष्मीः ॥ (वसन्ततिलका) १३

# ५६. ॥ श्रीज्ञानपञ्चकस्तोत्रम् ॥

(शार्दूलविक्रीडित)

अष्टाविंशतिभेदभिन्नगदितं, ज्ञानं शुभाद्यमतिः
सप्रज्ञाभिनिबोधिकश्रुतनिधेर्हेतुश्च बुद्धिप्रभे ।
पर्यायाः प्रथिता इमे बहुविधा ज्ञानस्य चैकार्थिनः
सम्यग्दर्शनसत्कमाप्तकथितं वन्दामि तद्भावतः ॥ १

अन्यज्ज्ञानचतुष्टयं स्वविषयं नैवाऽभिधातुं क्षमं
श्रीमत्केवलिनोऽपि वर्णनिकरज्ञानेन तत्त्वं जगुः ।
स्पष्टं स्वात्मपरप्रबोधनविधौ, सम्यक्छ्रुतं सूर्यवत्
भेदाःपूर्वमिताः श्रुतस्य गणिभिर्वन्द्याः स्तुवे तान्मुदा ॥ २

अल्पं तत्पनकावगाहनसमं चासङ्ख्यलोकाभ्रगं ।
ज्ञानं स्यादवधेश्च रूपिविषयं, सम्यग्दृशां तच्छुभम् ॥ ३

साधूनामप्रमादतो गुणवतां तुर्यं मनःपर्यवं
ज्ञानं तद् द्विविधं त्वनिन्द्रियभवं तत्स्वात्मकं देहिनाम् ।
चेतोद्रव्यविशेषवस्तुविषयं, द्वीपे च सार्धद्विके
सकृज्ज्ञानगुणाञ्चितान् व्रतधरान् वन्दे सुयोगैर्मुदा ॥ ४

निर्भेदं विशदं करामलकवज्ज्ञेयं परिच्छेदकं
लोकालोकविभासकं, चरमचिन्नान्त्यं व्रजेत्स्वात्मतः ।
निद्रास्वप्नसुजागरातिगदशं तुर्यां दशां सङ्गतं
वन्दे कार्तिकपञ्चमी श्रुतदिने सौभाग्यलक्ष्म्यास्पदम् ॥ ५

पू.मु.श्री रत्नचन्द्रगणिविरचितम्

## ५७. ॥ श्रीमातृकास्तोत्रम् ॥

(अनुष्टुप्)

अर्हन्तोऽजा अथाचार्या उपाध्याया मुनीश्वराः ।
मिलित्वा यत्र राजन्ते, तद् 'ॐ' कारपदे मुदा (दं मतम्)
अ अ आ उ म् ॥ १

बीज-मूल-शिखाकार्त्स्न्यमेकक-त्रि-त्रि-पञ्चभिः ।
अक्षरैः 'ॐ नमः सिद्धं', जपानन्तफलैः(लं) क्रमात् ॥
ॐ । ॐ नमः । ॐ सिद्धम् । ॐ नमः सिद्धम्
ॐ इत्यनुर्वतते ॥ २

नन्ता हन्त ! भवत्येको भवत्येकश्च शंसिता ।
शंसिता लभते कामान्, नन्ता लभति वा न वा ॥ ३

'हूँ' अर्हद् - धरणाचार्योपाध्याय-मुनिगोचरम् । ह् र् ऊ उ म् ।
सूर्युपाध्याय-मुनयः, स्पृशन्ति 'ॐ' कारमादरात् ॥
ऊ उ म् ॥ ४

'आँ' जिनाऽजनुराचार्य-मुनितः प्रादुरस्तीह ॥ अ अ आ म् ।
अर्हद् - धरण-वाग्देव्यो 'ह्रीँ' कारस्य निबन्धनम् ॥ ह् र् इँ ॥५

आद्युपान्त्यान्तिमार्हन्तो गीश्च 'अर्हँ' पदमास्थिताः
(गीश्चा ऽर्हँ पद-मास्थिताः) ।
ज्ञान-दर्शन-चारित्रमुक्तयो भान्ति तत्र वा । अ र् हँ ॥ ६

'श्रीँ' कारे श्रुत-धरणौ पद्मावत्यृषयः परम् । श् र् ई म् ।
'ह्रीँ' अर्हद्-धा(ध)रणाऽदेह-वाचकर्षिजमीरितम्
ह् र् अ उ म् ॥ ७

अर्हन्त-धरणाऽदेहैस्तपसा 'ह्रः' समाश्रितम् । ह् र् अ स् ।
'हंसः' जिनाऽजनुर्योगी, श्रद्धा-श्रुत-तपांसि च ॥
ह अ म् स् अ 'अत्यल्पमेतद् याक्षीयम्' । स् ॥ ८

पू.मु.श्री सर्वविजयगणिविरचितम्

## ५८. ॥ 'पुण्डरीक' शब्दशतार्थी स्तोत्रम् ॥

श्रीपूज्यपादभास्वत्-पादस्पर्शं प्रपद्य किल सद्यः ।
मध्येमानसमसकृत्, प्रसरति मम पुण्डरीकश्रीः ॥ (आर्या) १

(वसन्ततिलका)

सार्वज्ञशासनसुधाह्रदपुण्डरीक !,
सिद्धान्तशुद्धजलमञ्जुलपुण्डरीकः (!) ।
स्वामिंस्तव स्तवकृताविति पुण्डरीक-
शब्दं करोमि कणशः शमिपुण्डरीक ! ॥ २

मायामृगीनिधनसाधनपुण्डरीक-
विद्याभविद्यः ! भवमिणोरु(भवभित्तरु) पुण्डरीक ! ।
वाग्माधुरीविधुरितोद्धुरपुण्डरीक !,
जीयाद् भवानभिनवः किल पुण्डरीकः ॥ ३

पुष्यत्कषायगजगञ्जनपुण्डरीक !,
न्यक्षक्षमोद्धरणधीरिमपुण्डरीक ।

पात्के त्वदीयवचनोत्पलपुण्डरीक-
स्त्वां न स्तुते दुरितदारुणि पुण्डरीक ! ॥ ४

ज्ञानोरुनीरभरभर्त्सितपुण्डरीक !
लोपात् प-ते लवणिमोल्बणपुण्डरीक ! ।
मत्वा भवन्तमिव मूर्च्छति पुण्डरीक-
नेत्रस्य पत्रमथ मन्मथपुण्डरीक(कः) ! ॥ ५

पुण्यात्मनः प्रति निरूपितपुण्डरीक !,
पौ-केऽन्यतः पुनरुदाहृतपुण्डरीक ! ।
पुण्डस्थ-फर्फमुररीकृतपुण्डरीक-
स्त्वं नन्द निन्दितपरोदितपुण्डरीक ! ॥ ६

यद् बाभजीति भविको भुवि पुण्डरीक-
वप्रा विचित्रितभुवं गिरिपुण्डरीकम् ।
तत् ते वचोविलसितं किल पुण्डरीक-
पर्वोपदेशसमये शमपुण्डरीक! ॥ ७

सत्यादिनित्यसुकृतामृतपुण्डरीक !
द्वा(वा)णी पराऽस्य रसपूर्वगपुण्डरीक ।
दुष्कर्मदैत्यपुरुषोत्तरपुण्डरीक !
रङ्गत्कुरङ्गकदने भव पुण्डरीक ! ॥ ८

मन्ये महोपपदमन्त्रदपुण्डरीक !
बुद्धे च संशयमयामयपुण्डरीक ! ।
निर्दम्भवैभवविभावितपुण्डरीक !,
चक्रे भवान् स्वमतमद्वयपुण्डरीक(कम्) ॥ ९

